वर्षम् – ७०
अङ्कः – ११
भाद्रपदाश्विनौ
विक्रमाब्दः २०७७
युगाब्दः ५१२२
सितम्बर २०२०

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/–
वार्षिक–शुल्कम्
१५०/–
पञ्चवार्षिकशुल्कम्
७००/–
आजीवनसदस्यता
(१५ वर्षाणि)
२१००/–

प्रकाशन प्रत्येक माह की 1 तारीख

**जन्मशताब्दी-विशेषाङ्कः**



**आजीवनं संस्कृत-राष्ट्रसेवी यो भारतीं स्थापितवान् पुरेऽस्मिन्।**
**तस्यैषमो जन्मशताब्दपूर्तौ प्रणम्यते श्रीगिरिराजशास्त्री।।**

## विषय-सूची



| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | 'भारती' पत्रिकाया विकासयात्रा | प्रोफेसर श्रीकृष्णशर्मा | ६ |
| ३ | लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति | पं. प्यारेमोहनशर्मा | १० |
| ४ | नमोऽसकृदत्रभवते भवते | डॉ. नारायणशास्त्रीकाङ्करः | १२ |
| ५ | प्रत्युत्पन्नमतयो मन्त्रतन्त्रकोषाश्च | वेणीमाधव गो. धर्माधिकारी | १३ |
| ६ | संस्कृतभारत्यै सर्वात्मना समर्पिताः श्रीगिरिराजशर्माणः | देवर्षिकलानाथशास्त्री | १४ |
| ७ | संस्कृतसमाचारः | डॉ. नाथूलालसुमनः | १६ |
| ८ | गाङ्गो ह्रद इवाक्षोभ्यः | डॉ. राजेश्वरी भट्टः | १७ |
| ९ | श्रीगिरिराजशास्त्रिणोऽभिनन्दनम् | आचार्यः डॉ. शिवसागरत्रिपाठी | १८ |
| १० | शंसितव्रतः दादा-भाई | प्रोफेसर बनवारीलालगौडः | १९ |
| ११ | पारसमणिरिव दादाभाई | डॉ. विनोदकुमारशर्मा | २४ |
| १२ | सादगी और समर्पण की प्रतिमूर्ति ........ | कृष्ण कुमार शर्मा | २६ |
| १३ | प्रेरणा के स्रोत 'दादाभाई' | श्याम सुन्दर बिस्सा | २८ |
| १४ | कीर्तिर्यस्य स जीवति | प्रोफेसर सुरेन्द्रकुमारशर्मा | २९ |
| १५ | स्मरणाञ्जलिः | डॉ. नाथूलालसुमनः | ३० |
| १६ | 'क्षीयन्ते चास्य कर्माणि' इत्यस्य समीक्षणम् | प्रोफेसर प्रभावती चौधरी | ३१ |
| १७ | सप्त ऋषयः प्रतिहिताः शरीरे | डॉ. रामनारायणशास्त्री | ३६ |
| १८ | कालिदाससाहित्ये खगोलविज्ञानम् | जया शर्मा | ४० |
| १९ | संस्कृता श्रेष्ठभाषा | म.म. डॉ. कैलाशनाथद्विवेदी | ४३ |
| २० | प्रह्वं प्रतिनिवेदनम् | डॉ. सत्यव्रत वर्मा | ४४ |
| २१ | भारतीयशिक्षाव्यवस्थायाम् अन्तर्जालशिक्षणप्रणाली | डॉ. कुलदीपसिंहः | ४५ |
| २२ | लक्षणाविचारः | मदन सुमरा | ४९ |
| २३ | सूक्ति-सुधा | डॉ. प्रेमचन्द्रांवका | ५१ |



### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाष: 0141–2379014, मो. 9783105699**

(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
स्वामी संवित् सोमगिरिः
( बीकानेरम् )
महन्तः प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 70 अङ्कः -11
भाद्रपदाश्विनौ
विक्रमाब्दः 2077
सितम्बर, 2020

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# अङ्गीकृतं सुकृतिनः परिपालयन्ति

...✍ प्रोफेसर श्रीकृष्णशर्मा

ऋते शब्दादर्थज्ञानं न भवति, अर्थज्ञानं विना च पदार्थसत्ताया न किञ्चिदपि महत्त्वम्। सूर्य-चन्द्र-तारकादिग्रहनक्षत्रैरालोकितमपीदं जगच्छब्दज्योतिर्विना-ऽन्धकारनिमग्नमिवाऽभाति। सुष्ठूक्तमाचार्यदण्डिना-

**'इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।'**

(काव्यादर्शे १/४)

अतश्चेदं कथयितुं पार्यते यद् शब्देनानुविद्धमिदं जगत् । तस्मात् साफल्येन भवसागरं तर्तुं वाग्-रूपाया नावः समाश्रयणम् आवश्यकम् - **'वाचामेव प्रसादेन लोकयात्रा प्रवर्तते'** (काव्यादर्शे १/७)। व्यवहाराय मनोगतविचाराणामभिव्यक्तये च वागेवाश्रीयते जनैः। सर्वतः प्राग् आविर्भूता 'संस्कृतम्' इति दैवी वाक्। तत एवाधुना लोके वितता सर्वा वाक्। अतः 'संस्कृतं सर्वासां भाषाणां जननी' त्यपि प्रथितिः। इदानीं कलौ युगे यान्त्रिकयुगे वा दूरदूरतरेभ्यो देशेभ्यो जनेभ्यो वा सम्पर्कं साधयितुं प्रामाणिकं साधनम् हस्ताक्षरयुतं 'पत्रम्' मतम्। तदेव पत्रं देशान्तरीयसमाचाराणां सशक्तो माध्यमः सञ्जातः। हिन्द्याम् आंग्लभाषायाम्, तत्तद्देशीयभाषायाम् क्षेत्रीयभाषायां वा समाचारपत्राणि स्वस्वभूमिकामरचयन्। सर्वप्राचीनं विपुलञ्च संस्कृत-साहित्यं प्राक्कालत एवास्ति। संस्कृतभाषायां लेखनेऽपि विदुषां निराबाधा गतिः। अतः सर्जनात्मकेऽस्मिन् यान्त्रिके युगे संस्कृतेऽपि समाचारपत्राणि प्राकाशयन्। संस्कृतभाषायां पत्र-पत्रिकासु सम्यग्रूपेण प्रकाशनम् एकोनविंशतिशताब्द्यामभवत्। प्रारम्भे **काशीविद्या-सुधानिधिः (पण्डितपत्रिका), विद्योदयपत्रम्, विद्योदयः, संस्कृतचन्द्रिका, विज्ञानचिन्तामणिः, ब्रह्मविद्या, साहित्यरत्नावली, काव्यमाला, संस्कृत-कामधेनुः, श्रीवेङ्कटेश्वरपत्रिकाप्रमुखाः** नैकाः पत्रिकाः संस्कृते प्राविरभूवन्।

संस्कृतभाषायां दैनिक-साप्ताहिक-पाक्षिक-मासिक-द्वैमासिक-त्रैमासिक-चातुर्मासिक-षाण्-मासिक-वार्षिक-संस्कृत-पत्रिकाणां प्रकाशनं संस्कृत-विद्वद्भिः सुचारु अकारि। जयपत्तनादपि नैकाः संस्कृत-पत्रिकाः प्राकाश्यमुपगताः स्मः/सन्ति। दिङ्नामानि यथा- **'विद्यार्थी' 'विद्याविनोदः' 'संस्कृतरत्नाकरः' 'भारती' 'स्वरमङ्गला' 'वयम्' 'उपलब्धिः' 'शास्त्रसुधानिधिः'** (जोधपुरतः) प्रभृतयः। आसु **'भारती'** संस्कृत-मासपत्रिकायाः कथं समारम्भ इति रोचकं वृत्तान्तम्। श्रूयताम्। १९०४ खीष्टाब्दतः १९४९ खीष्टाब्दं यावन्निरन्तरं **'संस्कृत-रत्नाकरः'** इति नाम्ना अखिलेऽपि भारतवर्षे सुप्रथिता संस्कृतपत्रिका जयपत्तनतः प्रकाशमानाऽऽसीत्। किन्तु प्रकाशनव्ययस्य दौर्लभ्यादियमितो वाराणसीं प्रति स्थानान्तरिता जाता। सौभाग्यात् किञ्चित् कालानन्तरं तदानीं राष्ट्रियस्वयं-

सेवकसङ्घस्य वरिष्ठतमाः प्रचारकाः श्रीउमाकान्तकेशव-आप्टेमहाशयाः (बाबासाहब आप्टे महोदयाः) जयपुरं समागताः। श्रीमद्भिर्गिरिराजशास्त्रिभिः सह वार्तालाप-प्रसङ्गे श्रीबाबासाहबआप्टेमहोदयैर्यदेदं ज्ञातं यदितः जयपत्तनात् प्रकाशमाना 'संस्कृतरत्नाकर' पत्रिका वाराणसीं स्थानान्तरिताऽधुना च न काऽपि संस्कृतपत्रिकेतः प्रकाश्यते, तदाऽऽप्टेमहाशयैरादिष्टा 'दादाभाई' महोदया यज्जयपुरं विदुषामपरा काशी मन्यते, अतः पण्डितसभामायोजयन्तु। अपरेद्युस्तदनुसारं विद्वद्गोष्ठी समाहूता यस्यां महामहोपाध्यायाः श्रीगिरिधरशर्मचतुर्वेदाः, भट्टमथुरानाथशास्त्रिणः, पण्डितवृद्धिचन्द्र-शास्त्रिणः, स्वामिनः सुरजनदासाः, पण्डितजगदीशचन्द्रशर्माणः प्रभृतयो विद्वांसो भागं जगृहुः। महाराजसंस्कृतमहाविद्यालये समायोजिताया-मस्यां विद्वद्गोष्ठ्यामाप्टेमहाशयैर्विदुषां पुरस्तात् जयपुरतः संस्कृतमासपत्रिकामेकां प्रकाशयितुं समुद्बोधितम् आशङ्कितां प्रकाशनव्ययसमस्यां निराकर्तुमपि समाश्वसितम्, श्रीगिरिराजशास्त्रिदादाभाई-महोदयश्च प्रकाश्यमानायाः संस्कृतपत्रिकायाः प्रबन्धसम्पादकरूपेण नियुक्तः। संस्कृतपत्रिकाया नामकरणमपि '**भारती**' ति मीमांसाकेसरिभिः पट्टाभिरामशास्त्रिभिः सह परामर्शेन विहितम्। दादाभाईमहोदया आप्टेमहोदयानामाशीर्वादं प्रेरणाञ्च सोत्साहमङ्गीकृत्य १९५० तमे खीष्टाब्दे दीपावलि-दिवसात् 'भारती' संस्कृतमासपत्रिकायाः प्रकाशनं स्वामिनां सुरजनदासाभिधानानां सम्पादत्वे स्वकीय-प्रबन्धसम्पादकत्वे च समारभन्त। तद्दिनाद् यावज्जीवं पत्रिकेयमनवरतं प्रकाशमाना इदानीं सप्ततितमे वर्षे सम्प्रविष्टा। '**अङ्गीकृतं सुकृतिनः परिपालयन्ती**' त्याभाणकस्य श्रीगिरिराजशास्त्रिवर्याः प्रतिमूर्त्तय आसन्। स्वजीवने विद्वद्वर्यानन्विष्याऽन्विष्य पत्रिकासम्पादनाय न्यवेदयन्। तथा हि- १९५२ तः १९६४ खीष्टाब्दं यावत् (यावज्जीवनम्) भट्टश्रीमथुरानाथशास्त्रिणः, तदनन्तरं धर्मशास्त्रधुरीणाः श्रीवृद्धिचन्द्रशास्त्रिणः, आशुकवयः श्रीहरिशास्त्रिणः, मधुपाः श्रीदीनानाथत्रिवेदाः, पण्डितश्रीजगदीशशर्माणः, पण्डितश्रीप्यारेमोहनशर्माणश्च पत्रिकासम्पादनं स्व-स्ववैदुष्येणाकार्षुः। इदानीं देवर्षिकलानाथशास्त्रिणां प्रधानसम्पादकत्वे पङ्क्ती-नामासां लेखकस्य सम्पादकत्वे चेयं भारती पत्रिका प्रकाशनस्य नैरन्तर्यं प्राप्नोतीति हर्षप्रकर्षः। दादाभाई-महोदयानां पत्रिकाप्रकाशने कटिबद्धताया निदर्शनमिदं यत् जून १९७५ तः मार्च १९७७ खीष्टाब्दं यावत् आपातकाले (Emergency) अज्ञातवासेऽपि विदुषां पूज्यानां महात्मनामाशीर्वादमवाप्य पत्रिकाप्रकाशन-प्रबन्धं सम्यगकुर्वंस्ते। भारतवर्षे १९५० तः इदानीं यावद् निरन्तरं प्रकाशितासु संस्कृतमासपत्रिकासु 'भारती' पत्रिकाया उत्तमं स्थानं वर्तते। एतदर्थं स्वर्गीय-श्रीगिरिराजशास्त्रिदादाभाईमहोदयानामविस्मरणीय-मवदानं मत्वा तेषां शताब्दीवर्षे '**विशेषाङ्कं**' प्रकाश्य हार्दिकं सुमनोभावाञ्जलिमर्पयामः। तेषामेव तपः-प्रभावेणाऽनवरतमियं पत्रिका सम्यक् प्रकाशन-मधुनाप्येति।

**व्याकरणपीठाध्यक्षचरः,**

**जयपुरस्थ-राजस्थानसंस्कृतविश्वविद्यालये**

# 'भारती' पत्रिकाया विकासयात्रा

❑ प्रोफेसर श्रीकृष्णशर्मा

'**भारती**' संस्कृतमासपत्रिका बाबासाहब-आप्टे-महोदयानां सत्प्रेरणया 1950 तमे ख्रिस्ताब्दे 'दीपावलि' पर्व-दिनात् समारब्धाऽऽसीत्। आप्टे-महोदया: श्रीमन्तं गिरिराजशास्त्रिणं प्रथम**प्रबन्धसम्पादक**पदे न्ययुञ्जत। जयपुरत: 'संस्कृतरत्नाकर:' इति नाम्ना मासपत्रिकाया: 1904 ख्रिस्ताब्दत: प्रकाशनमारब्धमासीत्, 1949 ईशवीयाब्दे सा जयपुरत: काशीं प्रति स्थानान्तरिता जाता। सौभाग्यात् किञ्चित्कालानन्तरं तदानीं राष्ट्रियस्वयंसेवक-सङ्घस्य केन्द्रीयकार्यसमिते: प्रचारप्रमुखा: श्रीउमाकान्त-केशव-आप्टे (बाबा साहब-आप्टे) महोदया: जयपुरमागच्छन्। यदा तेऽज्ञासिषुर्यदित: कापि संस्कृतपत्रिका न प्रकाश्यते, तदा तेऽवदन् यदित: 'संस्कृतमासपत्रिकाऽवश्यं प्रकाश्येत' इति ममाभिलाष:। एतदर्थं जयपुरस्थ-महाराज- संस्कृत-महाविद्यालयीय-म.म.गिरिधरशर्मचतुर्वेद-भट्ट-मथुरानाथशास्त्रिप्रमुखानां विदुषाम् उपवेशनमायोजितम्, यत्र प्रान्तप्रचारकं **श्रीलेखराजशर्माणं** संस्कृतमास-पत्रिकाप्रकाशनाय 'आप्टे' महोदया: समादिष्टवन्त:। तत्रैवोपविष्टा: श्रीमन्तो गिरिराजशास्त्रिण: (दादाभाई) 'संस्कृपत्रिका' प्रकाशनाय दृढप्रतिज्ञा अभूवन्।

**श्री गिरिराजशास्त्री 'दादाभाई' (1921-2012 ई.)** - 'आप्टे' महोदया गिरिराजशास्त्रिवर्याणां कर्मठतामाकलय्य तान् संस्कृतमासपत्रिकाया: '**प्रबन्धसम्पादक**' इति पदे न्ययुञ्जत। श्रीगिरिराज-शास्त्रिण: संस्कृतमासपत्रिकाया नामकरणार्थं महाराजसंस्कृतमहाविद्यालयस्य प्राचार्यवर्यै: मीमांसा-केसरिभि: पण्डित-पट्टाभिरामशास्त्रिभि: सह परामर्शं विधाय 'सञ्जीवनी' 'भारती' वेति नामद्वयं पञ्जीकरणाय केन्द्रसर्वकाराय प्रार्थनापत्रं प्रेषितवन्त:। पञ्जीकरणकार्यालयतो '**भारती**' इति पत्रिकाभिधानम् अनुमोदितम्। इत्थं पञ्चाशदधिकैकोनविंशतिशततमे (1950) ख्रिष्टाब्दे '**भारती**' ति नाम्ना संस्कृतमास-पत्रिका पञ्जीकृता। इत्थं 1950 तमस्येशवीयवर्षस्य दीपावलिदिवसाद् '**भारती**' नाम्ना संस्कृतमासपत्रिका समारब्धा। श्रीगिरिराजशास्त्रिणां सम्पादकत्वे प्रगतिपथ-मारूढा निर्बाधं प्रचलन्ती सम्प्रति श्री-सुदामशर्मणां प्रबन्धसम्पादकत्वे प्रायेण सप्ततितम (70) वर्षाणां यात्रां कृतवती।

**श्री-सुदामा शर्मा** -

'दादाभाई' श्रीगिरिराजशास्त्रिणां विश्रमानन्तरं 2010 ईशवीयाब्दतो राष्टीयस्वयंसेवक-संघस्य वरिष्ठ: प्रचारक: श्री-सुदामा शर्मा महोदय: प्रचारककार्येण सह 'भारती' ति संस्कृतमासपत्रिका-प्रकाशनाय कटिबद्ध: सर्वात्मना प्रयतते। इदानीमस्य महोदयस्याथकप्रयासैरथ विदुष: प्रति निष्ठापूर्णव्यवहारेण च पत्रिकैषा निर्बाधगत्या प्रकाशतां याति। सर्वेषामेते शीलभूषणा: समादरभाज:।

इदानीं यावद् अस्यां 'भारती' संस्कृतमास-पत्रिकाया विकासयात्रायां **सम्पादकानां** योगदानमित्थं वर्तते -

**1. स्वामि-सुरजनदासः ( 1910-1990 ) -**

'भारती' पत्रिकाया **प्रथम**सम्पादकोऽयं विद्वान् व्याकरण-साहित्य-सांख्ययोग-वेदान्तशास्त्रेषु लब्धाचार्यपदवीकः, संस्कृते 'एम.ए.' इति परीक्षायामपि लब्धस्वर्णपदकः, जोधपुरविश्वविद्यालयीय-संस्कृत-विभागाध्यक्षचरः 1950 तः 1952 ईशवीयाब्दं यावद् वैदुष्योपेतं सम्पादन-कर्म समाचरितवान्।

**2. पण्डित-वृद्धिचन्द्रशास्त्री ( 1904-1964 ई. )**

महामहोपाध्याय-गिरिधरशर्मचतुर्वेदानां शिष्यः, 'आदर्श-दम्पती' त्युपन्यासस्य लेखकः, महाराज-संस्कृत-कॉलेजे धर्मशास्त्रविभागस्याचार्योऽध्यक्षचरः, 'संस्कृतरत्नाकर' इति प्रतिष्ठितसंस्कृतपत्रिकायाः सहसम्पादकचरो व्याकरण-धर्मशास्त्रयोर्लब्धप्रतिष्ठो मनीषिप्रवरो धर्मधुरीणः पण्डितवृद्धिचन्द्रशास्त्रिमहोदयः 1952 तः 1954 ई. पर्यन्तं 'भारती' पत्रिकां समपादयत्।

**3. भट्ट-मथुरानाथशास्त्री ( 1889-1964 ईशवीयाब्दः ) :**

'रसगङ्गाधर' नाम्नः काव्यशास्त्रीयग्रन्थस्य 'सरला' टीकाकारः जयपुर-साहित्य-गोविन्दवैभवानां प्रणेता, जयपुरस्थमहाराजसंस्कृतकॉलेजे साहित्यविभागाध्यक्ष-चरः, प्राक् 'संस्कृतरत्नाकरपत्रिकायाः' (1904-1949 ई.) कुशलः सम्पादकचरः 'भारती' मास-संस्कृत-पत्रिकायाः सम्पाकत्वं 1954 ई. वर्षत उररीकृत्य 1964 ई. वर्षं यावत् (निधनं यावत्) सम्पादनकार्यं निर्व्यूढवानयं कविशिरोमणिः भट्टमथुरानाथशास्त्रि-महोदयः।

**4. आशुकविः पण्डितहरिशास्त्री ( 1893-1970 )**

जयदेवमिश्रविरचित-'गीतगोविन्द' रचनामनुहरतः 'रामचन्द्रस्तवः' इति काव्यस्य प्रणेता, साहित्यशास्त्र-पारावारपारीणः, साधनाप्रवीणो महाराज-संस्कृत-कॉलेजस्य साहित्यशास्त्रप्राध्यापको महोपाध्याय आशुकविवरेण्यः पण्डितहरिशास्त्रिमहोदयः 'भारती' पत्रिकामिमां 1964 तः 1969 ई. यावत् (पञ्च वर्षाणि) सम्पादितवान्।

**5. पण्डित-दीनानाथत्रिवेदी 'मधुपः' ( 1914 - )**

महाराज-संस्कृत-महाविद्यालये न्यायशास्त्र-प्राध्यापकचरः, सागरगर्वोक्ति-दरिद्रतैकादश्यादिहास्य-व्यङ्ग्योद्दीपकरचनाकारः, भारत्यां 'नारी-स्तम्भ' लेखनसमारम्भकः, पण्डितप्रवरः श्रीदीनानाथत्रिवेदी 'मधुपः' मन्ये 1969 तः 1980 ईशवीयाब्दं यावत् 'भारतीपत्रिकाम्' समपादयत्।

**6. पण्डित-जगदीशशर्मा ( 1910 - 1997 ) -**

वीरेश्वरशास्त्रिद्राविडानां व्याकरण-न्याय-मीमांसा-धर्मशास्त्रेषु सच्छिष्योऽथ बिहारिलालशास्त्रिणां सविधे साहित्यशास्त्रेऽधिगतप्रावीण्यो जयपुरस्थ-महाराज-संस्कृतकॉलेजे साहित्यविभागस्याचार्योऽध्यक्षचरो राष्ट्रपति-सम्मानितः साहित्यशास्त्रस्य प्रौढो विद्वान् पण्डितजगदीशशर्मा 'भारती' पत्रिकायाः सम्पादनकार्यं अक्तूबर, 1980 ई. तः दिसम्बर, 1996 ई. यावत् निरवहत्।

**7. पण्डित-रामगोपालशास्त्री ( 1921 - 1992 ) -**

साहित्य-धर्मशास्त्राचार्यः, राजस्थानसंस्कृतशिक्षा-विभागे धर्मशास्त्रे प्राध्यापकः, राजस्थानसंस्कृतशिक्षा-निदेशालये उपनिरीक्षकपदे कार्यं निर्वहन्नसौ निम्बार्क-

सम्प्रदाये दीक्षितः पण्डितरामगोपालशास्त्रिमहोदयः 'भारती' पत्रिकायै पण्डितजगदीशशर्मणां प्रधान-सम्पाकत्वे सह-सम्पादकरूपेण नैकवर्षाणि सम्पादन-कार्यं निर्व्यूढवान्।

**8. देवर्षि कलानाथशास्त्री -**

ब्रजभाषायाः कवित्त-सवैयाप्रभृतिवृत्तेषु संस्कृत-कवनेन नूतनसरणिप्रवर्त्तकस्य मञ्जुकवितानिकुञ्जकाव्य-मालाया प्रकाशकस्य कविशिरोमणेर्भट्टमथुरानाथ-शास्त्रिणस्तनूजो विद्वज्जनचरितामृताद्यनेकग्रन्थानां सर्जको भाषाविभागसंस्कृतशिक्षाविभागयोर्निदेशक-चरः, राजस्थानसंस्कृताकादम्या अध्यक्षचरो राष्ट्रपति-सम्मानितो देवर्षिकलानाथशास्त्री 1954 तः 1962 पर्यन्तं स्वपित्रा सह भारत्याः सहायकसम्पादनकार्यमिदानीञ्च पञ्चाशीतिवर्षदेशीयोऽपि निष्ठापूर्वकं 1997 ईशवीयाब्दतो निरन्तरं प्रधानसम्पादकरूपेण सम्पादनकर्म निर्वहन्नसौ जयपत्तने चकास्ति।

**9. पण्डित-प्यारेमोहनशर्मा -**

राजस्थान-संस्कृत-शिक्षाविभागीयाचार्यसंस्कृत-महाविद्यालयेषु साहित्यशास्त्रे आचार्यप्राचार्यचरः, साहित्य-शास्त्रे नदीष्णानामाचार्य-जगदीशशर्मणां सच्छिष्यो राजस्थानसंस्कृताकादम्या निदेशकचरः पण्डित प्यारेमोहनशर्मा 1997 ख्रिष्टाब्दतः 2019 ईशवीयाब्दं यावद् (द्वाविंश वर्षाणि) 'भारती' पत्रिकायाः सम्पादनकार्यं कृतवान्।

**10. आचार्यः ( डॉ. ) श्रीकृष्णशर्मा -**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालयीय-संस्कृतविभागस्याचार्योऽध्यक्षचरः, वाराणसीस्थकाशी-हिन्दू-विश्वविद्यालयीय-व्याकरणविभागे प्रगताचार्यचरः (Visiting Professor), जयपुरस्थ-ज.रा. राजस्थान-संस्कृतविश्वविद्यालये म.म. गिरिधरशर्माचतुर्वेदी-व्याकरणपीठाध्यक्षचरः, मैथिलपण्डितखड्गनाथ-मिश्राणां पटुशिष्यः, वृत्तिमीमांसाकारोऽधीतव्याकरण-न्याय-साहित्यशास्त्रः 'स्वरमङ्गला' पत्रिकायाअपि सम्पादकः प्रोफेसर-श्रीकृष्णशर्मा सम्प्रति (नवम्बर, 2019 ई. तः) 'भारती' संस्कृतमास-पत्रिकायाः सम्पादनं विदधाति।

अस्याः 'भारती' पत्रिकायाः सह/सहायक-सम्पादनकार्यं कृतवन्तः कुर्वाणाश्च विद्वांसः सन्ति **पण्डितश्रीरामदवेः (1922-2013 ई.)** 'भृत्याभरणम्' इत्याद्यनेककाव्यग्रन्थानां प्रणेता, शाखाप्रबन्धकरूपेण बैंकसेवारतोऽपि संस्कृतस्य श्रेष्ठकविः, विश्वसंस्कृतप्रतिष्ठानस्य प्रदेशसंघटनमन्त्री, राष्ट्रियस्वयंसेवकसंघस्य समर्पितसदस्यः, जोधपुर-वास्तव्यः पण्डितश्रीरामदवेमहोदयो भारत्याः द्विसहस्र-ख्रिस्ताब्दतो नवम्बर, 2012 यावत् सहसम्पादक आसीद्।

**पण्डितपद्मशास्त्री ( सन् 1935-2015 )**

'लेनिनामृतम्' 'पद्यपञ्चतन्त्रम्' 'वेदविज्ञानामृतम्' इत्याद्यनेककृतीनां सर्जको राष्ट्रपतिसम्मानितः श्रीपद्मा-दत्तशास्त्रिमहोदयः द्विसहस्रख्रिस्ताब्दतो नवम्बर, 2012 यावत् सुदीर्घकालं यावदस्यै 'भारती' पत्रिकायै सह-सम्पादकरूपेण सेवां प्रदत्तवान्। अधुनाऽयं विद्वान् चिरस्मृतिं गतः।

**आचार्यः सुरेन्द्रकुमारशर्मा**

राजस्थानसंस्कृतशिक्षानिदेशकचरः, साहित्य-शास्त्रस्य प्रौढो विद्वान् प्रोफेसर-सुरेन्द्रकुमारशर्मा 2012

ईशवीयाब्दतो 'भारती' पत्रिकायाः 'सह-सम्पादक' रूपेण सपरिश्रमं कार्यं कुर्वन्नधुना जयपत्तने चकास्ति।

**पण्डित-शिवशरणनाथत्रिपाठी** -

साहित्य-व्याकरणशास्त्राचार्यः, अखिलभारतीय-संस्कृतसम्भाषणप्रतियोगितायां लब्धस्वर्णपदकः, समस्यापूर्तौ कुशलः, राजस्थानसंस्कृतशिक्षाविभागे साहित्यशास्त्रव्याख्यातृपदे सेवायां संलग्नः श्रीशिव-शरणनाथत्रिपाठी पञ्चदशवर्षेभ्यः 'भारती' पत्रिकायाः 2006 ई. तः 'सह-सम्पादक' कर्मणि संलग्नोऽस्ति।

**आचार्यः ( डॉ. ) हिन्दकेसरी ( 1947-2009 )**-

विद्वत्सु लब्धप्रतिष्ठो निविष्टवैयाकरणो राष्ट्रिय-संस्कृतसंस्थान-जयपुरपरिसरस्य प्राचार्यचरो डॉ. हिन्दकेसरी-महोदयः 'भारती' पत्रिकायाः सह-सम्पादकरूपेण द्विसहस्रख्रिस्ताब्दतो जून, 2009 ख्रिस्ताब्दं यावत् मनोयोगपूर्वकं समर्पितभावनया सम्पादनकर्म व्यधात्।

**डॉ. शिवचरणशर्मा** -

राजस्थानसंस्कृतशिक्षाविभागीय-राजकीय-वरिष्ठ-उपाध्यायविद्यालये प्रधानाचार्यः, संस्कृतसम्भाषणे कुशलप्रशिक्षकः, बङ्कविवरेण्यबंकिमचन्द्रचटर्जी-विरचित-'आनन्दमठ' इत्युपन्यासस्य संस्कृतेऽनुवादको डॉ. शिवचरणशर्मा ख्रीष्टाब्द-2012 तः जून, 2016 पर्यन्तं 'भारती' पत्रिकायाः 'सह-सम्पादक' रूपेण कार्यं सम्पादितवान्।

**डॉ. स्नेहलताशर्मा** -

राजस्थानसंस्कृतविश्वविद्यालये साहित्यशास्त्रस्य सुयोग्या विनम्रा च विदुषी सहायकाचार्य-पदमलङ्कुर्वती 'भारती' पत्रिकायाः 'सहायक-सम्पादक' रूपेण नवम्बर, 2019 ख्रिष्टाब्दतः सम्पादनकर्मणि साहाय्यं विदधाति।

**राजीवदाधीचः** -

'भारती' कार्यालये व्यवस्थापकपदे नियुक्तोऽत्यन्तं विनम्रः सन् 'भारती' पत्रिकाप्रकाशने विगतेभ्योऽष्टा-विंश (28) वर्षेभ्यः साहाय्यं विदधाति। एवमेव **'अविनाश आचार्यः'** अपि पत्रिकाप्रकाशनकर्मणि कार्यालये मनोयोगपूर्वं साहाय्यमाचरति।

पत्रिकाया द्वौ स्थायिस्तम्भौ वर्षेभ्यः प्रचलतः- 1. नारीस्तम्भः 2. आयुर्वेदस्तम्भः।

1. **नारीस्तम्भः** अस्य लेखिका साधनापुरस्काराद्य-नेकपुरस्कारैस्सभाजिता, सोमनाथसंस्कृतविश्वविद्यालय (गुजरात) द्वारा प्रदत्त-'डी.लिट्' इत्युपाधिनाऽलंकृता, लालबहादुरशास्त्रिकालेजे संस्कृतविभागाध्यक्षचरा **डॉ. राजेश्वरीभट्ट**-महोदया 1976 ईशवीयाब्दतः (44 वर्षेभ्यो) निरन्तरं 'भारती' पत्रिकायां सरलसंस्कृते नारीमहत्त्वप्रदर्शकं प्रेरणास्पदं हिन्दी-अनुवादसहितं यथाकालं लेखं लिखति।

2. **आयुर्वेदस्तम्भः** - जयपुरस्थ-राष्ट्रियायुर्वेद-संस्थानस्य निदेशकचरः, जोधपुरस्थ-राजस्थान आयुर्वेद-विश्वविद्यालयस्य कुलपतिचरः, राष्ट्रपति-सम्मानितो **डॉ. बनवारीलालगौडमहोदयः** प्राञ्जल-संस्कृतभाषायां हिन्द्यनुवादसहितां प्रतिमासमायुर्वेद-सम्मतां दिनचर्यां ऋतुचर्याञ्च 1986 ईशवीयाब्दतः (34 वर्षेभ्यः) निरन्तरम् आयुर्वेदस्तम्भरूपेण 'भारती' पत्रिकायां लिखति।

# लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति

❑ पं. प्यारेमोहनशर्मा

गिरिराजसदृशा गिरिराजा गिरिराज इव आत्मीया-नरक्षन्। कार्यं वा साधयेयं देहं वा पातयेयम् इत्यासीत् दादाभाईमहोदयानां मान्यता। भारतीपत्रिका जयपुरतः प्रकाशिता भवेदिति बाबासाहबआप्टेमहोदयानामाज्ञां दादाभाई एव सहर्षं स्वीचकार। जयपुरीयाः पण्डिताः संस्कृतपत्रिकायाः प्रकाशनं दुर्भरममन्यन्त। यद्यपि इतः पूर्वं संस्कृतरत्नाकरपत्रं पञ्चदशवर्षाणि प्राकाशिष्ट परन्तु न तच्चिरायुरभवत्। संस्कृतेऽक्षरसंयोजका नामिलन् मुद्रकाणामभावः, लेखका अपि नोपलभ्यन्ते, धनं नासीदिति बह्व्यः समस्या आसन्। परन्तु दृढनिश्चयो गिरिराजः सर्वं स्वयमसाधयत्। तस्यैवेदं फलं यदद्य भारती सप्ततिवर्षवयस्का स्वस्था च वर्तते नेयं कदाप्यस्वस्थाऽभवत्।

अहं पञ्चदशवर्षवयस्क आसम् तदैव दादभाई-महोदयैः साक्षात्कारोऽभवत्। प्रथमदर्शनकाल एव स माम् पुत्रप्रेम्णाऽसिञ्चत्। स्वतन्त्रताप्राप्यनन्तरं गान्धीमहोदयानां हत्यामादाय सर्वकारः राष्ट्रीयस्वयं-सेवकसंघे प्रतिबन्धमाचचार। अतः सत्याग्रहान्दोलनं संघाधिकारिभिः प्रारब्धम्। अहमपि सत्याग्रहक्रान्ति-आन्दोलने कारागारे गन्तुमुत्सकोऽभवम्। मदीयाः पितृचरणाः संत्रस्ता अभवन्। ते गुरुवर्याणां जगदीशाचार्याणां समीपमगच्छन् सर्वं वृत्तञ्चाकथयन्। गुरुवर्या दादाभाईमहोदयमाहूयाज्ञापयन् 'एष बालक' इति कृत्वा कारागारे न प्रेषणीयः। ते दादाभाईमहोदयाना-मपि गुरव आसन्। अत "आज्ञा गुरूणामविचारणीये" ति कृत्वा तेषामाज्ञामपालयन्। परन्तु ततः अशीतिवर्षाणि यावद् दादाभाईमहोदयैः सह मम सम्बन्धो निरन्तरं तेषां मार्गदर्शनं च सततममिलत्। अहं महाराजसंस्कृत-कालेजेऽपठम्। तत्र तदानीं दादाभाईमहोदयो व्यायामशिक्षक आसीत् परन्तु राष्ट्रीयस्वयं सेवकसंघेन घनिष्ठः सम्बन्ध आसीत्। वर्षद्वयानन्तरं संघाधिकारिणः प्रेरणया राज्यसेवां परित्यज्य पूर्णरूपेण संघकार्ये समलगत्। एतेषामेकः पुत्रः एका च पुत्री आस्ताम्। पुत्रः पुरुषोत्तम आयुर्वेदाचार्यपरीक्षामुत्तीर्य राज्यसेवायां वैद्यपदे नियुक्तोऽभवत्। पुत्री च विवाहिता श्वसुरालयेऽगच्छत्। गृहस्थभारं पुरुषोत्तमाय समर्प्य ते संघकार्ये समलगन्। ततः प्रभृति दादाभाई संन्यासी इव भारतीभवने एव न्यवसत्। संघकार्येण सम्पूर्णे भारतेऽभ्रमत्। ते संघकार्येण सह भारत्याः कार्यमप्यकुर्वन्। तत्र तत्र पण्डितैः अमिलन् तान् भारत्यां लेखान् प्रेषयितुं प्रैरयन्। धनिकेभ्यो धनं प्राप्नुवन्। भारत्यां ग्राहकानरचयन्। इत्थं संघकार्येण सह भारतीकार्यमप्यकुर्वन्।

एकदा भारतीभवने समुपविष्टास्तेऽकथयन् यत् गुरवो गोलवल्करा एकदा जयपुरमागच्छन् मदीयाग्रहेण ते मम गृहे आगच्छन्। तत्र मदीयाः पितृचरणाः तेषां स्वागताय समुपस्थिता आसन् परन्तु गुरवः सद्यः मदीय-पितृचरणयोः प्राणमन्। ततः पितृचरणाः अत्यन्तं प्रभाविता अभूवन्। परेद्युस्ते मामकथयन् सम्पूर्णभारतस्य सरसंघचालका मदीयं भृशं सम्माननमकुर्वन्, मदीयं जीवनं तु सफलं संजातम्। एकदा स्वयंसेवकैः सह भोजने समुपविष्टा गुरवः माम् स्नेहेनात्मनः समीपमेवोपावेशयन् भोजनसामग्रीं च स्वहस्तेनैव प्रायच्छन् मदीयं नाम च **'दादाभाई'** इत्यघोषिषुः।

ते सदैव स्वयंसेवकानामुत्साहमवर्धन्त। मां ते बौद्धिकं प्रदातुं प्रैरयन्। एकदा ते दौसानगरे तत्रत्यानां

स्वयंसेवकानां महतां बोद्धिकीं समायोजयन् अहं तदानीं तत्रत्ये संस्कृतमहाविद्यालये प्राचार्य आसम्। दादाभाई सभामायोजितुं तत्र आगच्छन्। संस्कृतमहाविद्यालये आगत्य ते मामकथयन् चलतु स्वयंसेवकेभ्यः बौद्धिकं प्रदातुम्। सभाया अध्यक्षतामपि भवानेव करिष्यति। अहं तैः साकमेव तत्रागच्छम्। शतत्रयसंख्याका स्वयं सेवकाः पङ्क्तिबद्धा उपविष्टा आसन्। मुख्यातिथिपदे तत्रत्य नगरपालिकायाः प्रधाना भगवान्-सहाय शर्माण आसन्। वयं त्रयः आसन्द्यामुपाविशाम। दादाभाई स्वयं संचालनमकरोत्। ध्वजप्रणामानन्तरं मुख्यातिथयोऽ-भाषन्त। तत अहं वक्तुमुदतिष्ठम्। संघस्याधिकारिणो यथा बौद्धिकं यच्छन्ति तथैवाहमभाषम्। ततो दादाभाई सर्वेभ्यो धन्यवादं व्यतरन्। मदीयबौद्धिकेन दादाभाई अत्यन्तं प्रसन्नोऽभवत्।

आत्मीयानां स्वयंसेवकानां सदैव ते उत्साह-मवर्धन्त। एकदा जयपुरनगरसमीपे बगरूजनपदे संस्कृतविद्यालयस्य प्रधानाध्यापकेन मदीयभ्रात्रा राधामोहनेन विद्यालयस्य वार्षिकोत्सवे विद्यापाठक महोदया शिक्षामन्त्री दादाभाईमहोदयश्च विशिष्टातिथिपदे तत्र आमन्त्रिताः। दादाभाईप्रेरणयैव विद्यापाठकमहोदया तत्रागच्छत्। विद्यापाठकमहोदयानामुद्बोधनानन्तरं दादाभाई अभाषत। संघस्य कार्यं संघटनं संस्कारप्रदानं चेति तैरुक्तं, ततश्च तेऽवदन् अधुना भवन्तः स्वकार्याय संस्कृत-विद्यालयस्य प्रधानाध्यापकमेव कथयन्तु ते विद्यापाठकं निवेद्य सर्वाणि साधयिष्यन्ति। एते जयपुरे वसन्ति, अतो गृहगमनकाले भवतां कार्याणि शिक्षामन्त्रि-द्वारा कारयिष्यन्ति।

**समयपरिपालका दादाभाईमहोदयाः** - अहं बीकानेरनगरे संस्कृतमहाविद्यालयस्य प्राचार्य आसम् एकदा संस्कृतमहाविद्यालयस्य वार्षिकोत्सवे दादाभाई-महोदयानां सम्मानो विधेय इति निश्चयः सञ्जातः। दादाभाईमहोदया एतदर्थं निवेदिताः। ते स्वीकृतिं प्रायच्छन् अवदन् च यत् रेलयानेन समायास्यामि, निश्चितसमये समुपस्थितो भविष्यामि। अस्माभिर्महा-विद्यालये यथासमयं सर्वं सुसज्जितं कृतम्, दादाभाई-महोदयानां स्वागताय महाविद्यालयीयाः शिक्षकाः तत्रत्यसंघाधिकारिणो द्वारि समुपस्थिता अभूवन्। एकादशवादनस्य समयो निर्धारित आसीत् परन्तु दादाभाईमहोदयाः समये नैव समायाता, एकहोरानन्तरम् अर्थात् द्वादशवादनसमये रेलयानमागतं न वेति ज्ञातुं स्टेशने सेवकः प्रेषितः। स समये एव रेलयानमागतमिति सूचनां प्रायच्छत्। संघाधिकारिभः दूरभाषद्वारा वस्तुस्थितिं ज्ञातुं प्रयत्नः कृतः परन्तु कापि सूचना न प्राप्ता। सायं सप्तवादनसमये सहसा दादाभाई महोदया बीकानेरे संघकार्यालये समागच्छन् इति तत्रत्याधिकारिणो माम् असूचयन्। अहमपि कार्यालये अगच्छम्। विलम्बः कथं जात इति विषये दादाभाई महोदया अकथयन् जयपुरात् रेलयानं समये प्राचलत् परन्तु मार्गे यानस्य इञ्जनं दूषितं सञ्जातम्। होरापर्यन्तं प्रतीक्षां विधाय रेलयानं परित्यक्तम्। ततः समये बीकानेरं समागन्तुमना पार्श्वस्थे ग्रामे पदातिरेवागच्छम् परन्तु तत्र नोपलब्धं किमपि यानम्। ग्रामीणा अवदन् पार्श्वस्थे जनपदे यानं मिलिष्यति। तत्रागच्छम् तत्र जीपयानमुपलब्धम्। तस्मिन् समुपविश्य क्रोशद्वयपर्यन्तं समागच्छम्। तत्र तद्यानमपि रुग्णं जातम्। पुनः कमपि पुरुषं सम्प्रेष्यापरं जीपयानं सम्प्राप्तम्। परन्तु तदपि यानं किञ्चिद्दूरं गत्वावरुद्धम्। अन्ते च चतुर्वादनसमये बसयानं समुपलब्धम्। तेनाधुना समायातोऽस्मि। कथनस्यायमभिप्रायो विद्यते यत् समये समागमनाय ते निरन्तरं प्रायतन्त। ततश्च रात्रौ संघकार्यालये तेषां सम्मानः सोत्साहमस्माभिः सम्पादितः। बहूनि संस्मरणानि सन्ति। परन्तु संक्षेपत एतानि एव लिखितानि मया।

# नमोऽसकृदत्रभवते भवते

❑ डॉ. नारायणशास्त्रीकाङ्करः

अयि विश्व-विश्रुत-महा-दानवीर-महर्षि-दधीचि-वंशोद्भव।
'दादाभाई' ति सदा, सुविदित सुधीन्द्र श्रीगिरिराज शास्त्रिन्।। 1।।
नमोऽसकृदत्र भवते, भवते भवदीय-जन्म-शताब्द्यामद्य।
हर्ष-प्रकर्ष-महमपि च, समनुभवामीह समस्त-बुध-जनैः सह।। 2।।
स्मरणीयावसरेऽस्मिन्, भवत्-संस्थापित-भारती-परिवारः।
विशेषाङ्क-प्रकाशनं, करोतीति तं भूरि भूरि साधु वच्मि।। 3।।
भवाँस्तु दधीचिर्यथा, राष्ट्रीय-स्वयं-सेवक-सङ्घाय स्वम्।
सर्वथैव समर्पयँस्-तत्कार्यालयमेवाध्यवात्सीत् सदा।। 4।।
स्व-शरीरमपि भवानिह, मैडिकल-कालेजाय परोपकृतये।
प्रदत्तवानयि पण्डित-पुङ्गव श्रीगिराजशास्त्रिन् प्रणम्य!।। 5।।
संस्कृत-संस्कृति-प्रचार-प्रसारार्थं 'भारती'-पत्रिकेयं तु।
भवतैव संस्थापिता, श्रीयुत-बाबा-साहबाप्त-प्रेरितेन।। 6।।
आदौ नियत-विषयेषु, रचना इह तत्तद्-विद्वद्भ्य आदाय।
प्रकाश्यन्ते स्म, किन्तु न, तथाऽद्य तु स्वयमेव लेखका लिखन्ति।। 7।।
अहमस्याः प्रथमाङ्कात्-लेखको ग्राहकश्चास्मीति गर्वामि।
आपत्कालेऽपीय-मिह स्वीय-पाठक-मनोऽरञ्जयदेव।। 8।।
प्रबन्ध-कुशलो भवान्, सुदीर्घायुष्यमस्यै प्रदत्तवान्।
सकलमपि संस्कृत-जगत्, कदापि नैव विस्मर्त्ता भवन्तम्।। 9 ।।
उत्तरोत्तरमुत्कर्ष-माप्नुवन्ती, 'भारती' यं सौन्दर्ये।
सम्पूर्णेऽपि राष्ट्रेऽद्य, वर्चस्वं निजमत्र संस्थापितवती।। 10।।
समये समये सुयोग्य-सम्पादक-तल्लजैः सुशृङ्गारिता तु।
'भारती' पत्रिकैषा, स्व-वैशिष्ट्यान् मनः समाकर्षत्येव।। 11।।
परमिदानीं मङ्गला-चरण-मासावतरण-शून्या 'भारती'।
कुङ्कुम-शून्य-ललाट-वती विधवा स्त्री व न शोभते कदापि।। 12।।
'भारतीं' संस्थाप्यैव, यशः-शरीरेण सदाऽजरोऽमरोऽभूत्।
सम्प्रति चापि स्वर्गे, देवताभिः सार्धं मोमुदीति भवान्।। 13।।
भवतोत्थानोपवेश-नाशन-पानामोद-प्रमोद-वार्त्तादि।।
तु सकलमेव साम्प्रतं, सर्वथा स्वप्नवदेव सञ्जातमत्र।। 14।।
भवद्-विषयकं कथ्यं, तु वरीवर्त्ति नूनमनन्तमेव पूज्य!।
न मम लेखनीयं तद्-वर्णने शक्तेतिसप्रणति निवेदये। 15।।
ऊनत्रिंशे केसर-विहारे विद्या-वैभव-भवनेऽधुना।
जगत्पुराख्य-जयपुरे, वासी विरमति नारायणकाङ्करः।।

# प्रत्युत्पन्नमतयो मन्त्रतन्त्रकोषाश्च

**( परमपूजनीयाः प्रातः स्मरणीयाः ( दादाभाई ) पं. गिरिराजशास्त्रिणः )**

❑ वेणीमाधव गो. धर्माधिकारी

परमपूजनीयाः प्रातः स्मरणीयाः (दादाभाई) पं. गिरिराजशास्त्रिणः प्रत्युत्पन्नमतयः मन्त्रतन्त्रकोषाश्चासन्। एकदाऽहं तेषां समीपे गतः। तैश्चर्चाप्रसङ्गे कथितं माधव! जगद्गुरवः शङ्कराचार्याः वासुदेवानन्दमहोदयाः मामवदन् भवतां संघे अन्यत्तु सर्वं समीचीनं परं प्रार्थनायां पूर्वं मातृभूमेः जडायाः प्रार्थना पश्चाच्च प्रभोरिति नोचितं प्रतीयते। मया कथितं नैवं कथ्यतां प.पू. ड्राक्तरमहोदयैः सुविचारं सर्वं कृतमासीत्। मातृभूमिः विष्णुपत्नी ''समुद्रवसने देवीति स्मर्यताम्। एवं पत्न्याः पूर्वं प्रयोगस्तु शास्त्रसम्मतः सीतारामौ, उमामहेश्वराविति वदत्र पूर्वं प्रयोगस्यौचित्यमेव। एवं त्वरितमेव गिरिराजशास्त्रिणा तेषां समाधानं कृतम्। जगद्गुरुणापि तत्स्वीकृतम्। एवं तर्हि तु सर्वं समीचीनमेव।''

प्रधानमंत्रिण्या इन्दिरया योजिते प्रतिबन्धेऽपि मनोऽतीव व्याकुलितं संतप्तं चासीत्। ये राष्ट्रभक्तास्ते तु कारागारे पीड्यन्ते राष्ट्रद्रोहिणश्च राज्यं कुर्वन्ति। मया हनुमन्मंत्रस्य जपो विहितः। मया विचारितं राष्ट्रकार्यं तु महद् वर्तते ममैकस्य जपेन किं भविता। परं मन्त्रस्य प्रभाव ईदृशो जातः इन्दिरा स्वयमपि पराजिता। अथास्य चर्चा मया दादाभाईमहोदयस्य सम्मुखे कृता तदा तैः कथितं नैवं विचारणीयं यदहमेकाकीति, न ज्ञायते कति जनाः किं किं जपादिकं कुर्वन्ति एवमेव। तेषां सामूहिकी शक्तिः सम्मिल्य कार्यं सम्पादयति।

अथैकदाऽहं तेषां समीपे गतः। त्वरितमेव तैः प्रश्नः कृतः कस्य देवस्योपासकोऽसि? मया कथितं भगवतो दत्तात्रेयस्येति। त्वरितमेव तैः दत्तात्रेयस्य मंत्रः प्रोक्तः। अस्य जपं करोषि किम्। मया कथितं बीजमन्त्रमेव षडक्षरीकृत्य जपामि। षडक्षरीकरणेन तस्यार्थः ''सर्वशक्तिमान् दत्तात्रेयस्तस्मै नमः'' इति जायते। तैः कथितं मया प्रोक्तं मंत्रं जप। मया कथितं लेखयन्त्वत्र भवन्तः। तैः लेखनी पत्रं च दापितम्। मया लिखितो मन्त्रः। गृहे आगत्यैकस्मिन् पुस्तके मन्त्रोऽयमवलोकितः। मया चिन्तितमद्य का तिथिः। त्रयोदशी, अहो सा तु सर्वसिद्धा त्रयोदशी। अद्यापि मन्त्रोऽयं जप्यते मया। एवं ते सर्वदेवानां मन्त्रं जानन्ति स्म मम च मन्त्रगुरवः।

अथ कतिपयदिवसानन्तरं भारतीपत्रिकायाः कार्यकर्त्तारो मत्समीपे समागताः। देवपूजादिकार्यसंलग्नं मां दृष्ट्वा मन्त्रं दातुं कथितम्। मया कथितं भवन्तस्तु मंत्रकोषालये वसन्ति। तैः कथितं ते तु न कस्मैचिदपि किमपि कथयन्ति। अहो भवतां सम्मुखे मह्यं प्रदत्तो मंत्रः कथमिदं कथ्यते। मन्त्रग्रहणसामर्थ्यवते मंत्रो दीयते न यस्मै कस्मैचिदपि। अथापि मया ऋणहरणगणपतिस्तोत्रं प्रदत्तमेव। तैः कथितं ऋणहरणस्यावश्यकता नास्ति। मया कथितं ऋणं बहुविधं वर्त्तते मातृऋणं, पितृऋणमाचार्य-ऋणं तदस्य मातृभूमिऋणे प्रयोगो विधेयः।

एवं दादाभाईमहोदयाः प्रातः स्मरणीयाः श्रीगिरिराज शास्त्रिणः प्रत्युत्पन्नमतयो मंत्रकोषाः सन्तोऽपि राष्ट्रीयस्वयंसेवकसंघस्याधिकारिणः कर्मठाश्चासन्।

**ब्रह्मपुरी, जयपुरम्**

# संस्कृतभारत्यै सर्वात्मना समर्पिताः श्रीगिरिराजशर्माणः

❑ महामहोपाध्याय-देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

दादाभाईतिनाम्ना जयपुरे ख्यातानां पं. गिरिराजशर्म-शास्त्रिणां समग्रमपि जीवनं राष्ट्रस्य, संस्कृतेः, संस्कृतस्य च सेवायां समर्पितमस्थादिति सर्वे संस्कृतसेविनो जानन्त्येव यतो हि गतेभ्यः षष्टिवर्षेभ्यस्तेषामनवरतं समर्पणं, सततसाधना, सर्वाङ्गपूर्णोऽभिनिवेशश्चेमां संस्कृतपत्रिकां 'भारती' नाम्नीमद्यावधि जीवितां निरन्तरं प्रसरन्तीं च रक्षितवान् इति सर्वे मन्यन्ते। अष्टदशकानां समर्पणमिदं संस्कृतस्येतिहासेऽभिलिखितं स्थास्यति। एतस्यैव सम्माननाय "अभिनन्दनग्रन्थ" समर्पणादयः प्रक्रमाः प्रसरन्ति। एतस्याः साधनायाः सम्माननं राजस्थानसर्वकारेण 2008 ई. वर्षे आजीवनसेवा सम्मान-रूपेण शिखर-सम्मानेन संस्कृतदिवससमारोहे कृतमभूत्।

भारतीपत्रिकायास्तु बीजारोपणमपि तैरेव कृतं, तेषामेव सततसाधना तामिमां पुष्पितां फलितां च व्यदधात्, तेषामनवरताभिनिवेशस्यैवायं परिणामोऽस्ति यत् समस्तेभ्य एभ्यः षष्टिवर्षेभ्यः सेयं पत्रिका निरन्तरं प्राकाश्यत, एकस्यापि मासस्य एकस्याप्यङ्कस्य व्यवधानं समयातिपातो वा नाऽभूत्। 1975 ई. वर्षे यदा समस्तेऽपि देशे आपातकाल आरोपितोऽभूत्, सहस्रशो जना विविधेभ्यः कारणेभ्यो निगृहीता, दुरवस्थाग्रस्ताः कारागारे निबद्धा अतिष्ठन्, निर्दोषा जयपुरमहाराज्ञी गायत्रीदेवी, ग्वालियर महाराज्ञी, अन्याश्च महिला अकारणं कारागारे पातिताः कष्टान्यसहन्त, पत्रपत्रिका आदि निगृहीतप्राया एवाऽभूवन् यतस्तेषां प्रकाशनं संकटग्रस्तमभूत् प्रत्येकमङ्कस्य प्रकाश्या सामग्री पूर्वं शासनाय प्रदर्शनीयाऽभूत् 'सेन्सरा' ख्यनियंत्रकाज्ञां विना मुद्रणमसम्भवमभूत्, बहूनि पत्राणि मृत्युमवापुः, किन्तु तदानीमपि **भारती** सेयमनवरतं प्राकाश्यतेति किं नाश्चर्यकरं कथ्यम्? श्रीगिरिराजशर्मणां साधनाया एवेदं विस्मयकारकं फलमभूद् यदा तेष्वपि मासेषु भारत्या अङ्का यथावत् प्राकाश्यन्त। षष्टिवर्षाणामनवरत-प्रकाशनस्य कीर्तिमानमिदमस्याः पत्रिकाया अनितर-साधारणं गौरवम्। प्रबन्धसम्पादकत्वेन प्रारम्भादेव गिरिराजशर्माण एतस्या नियामका अभूवन्।

कदा सेयं पत्रिका बाबासाहेब आप्टे महोदयानां प्रेरणया 1950 ई. वर्षे प्रारभ्यत, कथं चास्याः प्रथमसम्पादकत्वेन सुरजनदासस्वामिनस्तदनु पं. वृद्धिचन्द्रशर्माणः कार्यमकुर्वन्, किन्तु 1952 वर्षतः 1964 वर्षपर्यन्तं मत्पितृचरणैः देवर्षिभट्टश्रीमथुरानाथ-शास्त्रिभिः प्रधानसम्पादकत्वेन सेयं परिमार्जिता, तदनन्तरं पं. हरिशास्त्रिजगदीशशर्मभ्यां सम्पादिता, 1997 वर्षेऽहं प्रधानसम्पादकत्वेनास्याः सेवां समनुतिष्ठन्नस्मीत्यादी-तिहासस्त्वन्यत्र पठित एव स्यात् पाठकमहानुभावैः किन्तु पत्रिकाया अस्या वित्तीयव्यवस्था, प्रेषण-मुद्रणादिकः सर्वोऽपि प्रबन्धो गिरिराजशर्मणामेव कृत्यमभूत्। गतानां षष्टिवर्षाणामितिहासो मच्चक्षुषोरद्य नृत्यतीव यतोहि यदा पत्रिका सेयं प्रारभ्यत तदाऽहं शास्त्रिकक्षायामधीया-नोऽभूवम्। मत्पितृचरणा जयपुरस्य महाराजसंस्कृत-कालेजात् 1942 ई. वर्ष एव सेवानिवृत्ता अभूवन् किन्तु मादृशान् गृहे पाठयन्ति स्म। अस्मिन्नेव भारतप्रथिते महाराजसंस्कृतकालेजे गिरिराजशर्माणः साहित्यशास्त्र-परीक्षायाः कृते मत्पितृचरणानां शिष्या अभूवन्निति ते सस्नेहं स्मरन्ति स्म।

छात्रावस्थायां गिरिराजशर्मा सुदृढगात्रो, व्यायाम पटुर्मल्लविद्यारूचिमांश्चाप्यभूदिति ते कथयन्ति स्म। मत्पितृचरणा अपि यौवने व्यायामप्रिया अभूवन्। अतो गिरिराजशर्मा तेषामपि स्नेहमधिजगाम। शनैः शनैरयं राष्ट्रसेवादत्तचित्तोऽभूत्। राष्ट्रीयस्वयंसेवकसंघस्य प्रभावस्तदानीं (1947-48) सुभृशं प्रासरद् देशे। अत एवायं परिवारस्य जीविकायाश्च चिन्तां विहाय राष्ट्रसेवायै स्वात्मानं समार्पिपत्। तस्या एवाङ्गत्वेन संस्कृतसेवा-मप्यमन्यत साधनीयाम्, भारतीपत्रिकासेवाम-प्यारम्भादेवागृह्णात्। सेयं सेवा पत्न्या वियोगेऽ-प्यक्षुण्णाऽस्थात्, युवकस्य पुत्रस्य वियोगोऽप्येनं सेवाविरतं कर्तुं नाऽक्षमत। अर्थकष्टान्यनेन सोढानि, भारत्या मुद्रणाय नाऽभूत् पर्याप्ता वित्तीयव्यवस्था, किन्तु यथाकथञ्चित् प्रवासं विधाय, कोलिकातादिनगरेभ्यो धनिकानां संस्कृतसमर्थकानां साहाय्यमादाय भारती-पत्रिकाया सातत्यमनेन रक्षितम्। एवंविधास्वपि स्थितिषु भारत्या विशेषाङ्काः साधु प्राकाशिषत। आयुर्वेदाङ्कः रामानन्दविशेषाङ्कः अन्ये च विशालकाया विशेषाङ्का अद्यापि द्रष्टुं शक्यन्ते ये तदानीं प्रकाशिता अभूवन्।

मत्पितृचरणानां शिष्योऽभूत् दादाभाई गिरिराजशर्मा मत्तः पूर्वम्, स जयपुरे 1921 ई. वर्षे जातः 1940-42 ई. वर्षेषु तच्छिष्योऽभूत्, अहं तदनन्तरं तेषां शिष्योऽभूवम्, अतोऽयं ममाग्रज इत्यादरमहं सर्वथाऽन्वभवम्। साहित्याचार्यपरीक्षामुत्तीर्य 1952 ई. वर्षेऽहमाङ्गल-भाषायाश्छात्रोऽभूवम्। 1957 ई. वर्षे आङ्गलभाषायाम् एम.ए. परीक्षामुत्तीर्य महाविद्यालये आङ्गलभाषा-प्राध्यापकत्वमधारयम्। कालखण्डेऽस्मिन् मत्पितृ-चरणा भारतीप्रधानसम्पादका अभूवन्। तदानीमेव गिरिराजशर्मभिरहमनुरुद्धो यद् भारतीपत्रिकाया-माधुनिकसमयोचिता सामग्र्यपि समावेश्येत, एतत्कृते मया स्वपितृचरणानां साहाय्यं किमिति न क्रियते? विविधानामाधुनिकस्तम्भानां, संस्कृतशिक्षणपाठानां, विश्ववार्तासदृशानामाधुनिकसामग्रीणां च यथोचितः समावेशो भारत्यां वाञ्छनीय इत्यादिष्टेन मया 1954 वर्षात्सहायकसम्पादकत्वेनापि कार्यमारब्धम्। स्वयं जयपुरात् स्थानान्तरितेन मया 1962 वर्षे तत् कार्यं परित्यक्तमिति कथान्तरम्।

राजस्थानसर्वकारीयभाषाविभागस्य निदेशकत्वेन 1976 ई. वर्षात् 1994 ई. वर्षपर्यन्तं कार्यं कृत्वा मध्ये संस्कृतशिक्षानिदेशकत्वेनापि कार्यं कृत्वा 1994 ई. वर्षे सेवानिवृत्तोऽहं 1995 ई. वर्षे राजस्थानसंस्कृत-अकादम्या अध्यक्षत्वेन नियोजितः शासनेन। तदानीं गुरुचरणाः पं. जगदीशशर्माणः पत्रिकाया अस्या भारत्याः प्रधानसम्पादकत्वेन कार्यं कुर्वाणा अभूवन्। तेषां स्वर्गारोहणानन्तरं गिरिराजशर्मभिरहमनुरुद्धो यत् सम्प्रति प्रधानसम्पादकत्वभारमहं वहेयमिति। अग्रजस्य तामिमामाज्ञामनुपालयता मया सपद्येव कार्यमारब्धं 1997 ई. वर्षे जनवरीमासादेव प्रधानसम्पादकत्वेन। नान्यः पन्था आसीत्।

इत्थं हि भारत्याः पत्रिकाया अस्याः सातत्याय कदा कीदृशो जनः कस्मिन् कार्याय विनियोजनीय इत्येतेषां दृष्टिः सर्वदैव जागरूकाऽस्थात्। द्वादशवर्षात्मकेऽस्मिन् काले मया दृष्टं यदेतेषां चिन्तनं रात्रिन्दिवं ''भारती'' मयमेवाऽभूत्। एते खलु पञ्चभ्यो दशकेभ्यो भारतीकार्यालय एव निवासमारेभिरे। अनुदिनं पत्रिकाया एव चिन्ता एतेषां मानसे विचरन्ती दृष्टा। विरलान्ये-वैतादृशान्युदाहरणानि भवेयुर्यदेकः कश्चिदविचलमतिः साधकः समग्रमपि जीवनं पत्रिकायाः कस्याश्चन सेवायां समर्पयेत् तन्मयत्वेनैव जीवनयात्रां परिचालयेत्।

अत एवंविधं समर्पणं दृष्ट्वाऽन्येऽपि सहकर्माणः, सहयोगिनः सेवकाश्च ''क्षुद्रस्वार्थान् परित्यज्य

साहित्यसेवायै, राष्ट्रसेवायै, संस्कृतसेवायै च यावान् श्रमः समयश्च प्रयोक्तुं पार्यते, स सार्थकत्वमावहेत्'' इत्यादि चिन्तयेयुरिति स्वाभाविकमेव। एवं विधं समर्पणं दृष्ट्वा महनीया धर्माचार्या राष्ट्रनायका वा पत्रिकायाः, संरक्षकत्वं, सहायकत्वं चाङ्गीकुर्युरित्यपि स्वाभाविकमेव। इत्थं हि दादाभाई गिरिराजशर्माणो भारत्याः सातत्ये न केवलं निमित्तकारणत्वं वहन्ति, असमवायिकारणत्वमपि वहन्ति, समवायिकारणत्वमपि यदि तेषां कश्चन मन्येत, न तत्र किञ्चिदनौचित्यं स्यात्।

एतदतिरिक्तं तेषां जीवनस्याधारभूता ये विश्वासाः मयाऽवलोकितास्तेषु प्रामुख्यमस्ति स्वराष्ट्रस्य, स्वभाषायाः, स्वधर्मस्य, स्वसंस्कृतेश्च सर्वात्मनाऽनुसरणं श्रद्धानुपालनं विश्वासधारणं च। सर्वदैव भारतीयां वेशभूषां दधानैरेभिः स्वभाषाया एव प्रयोगस्य तादृशी परम्पराऽपि प्रचालिताऽभूद् यामद्य वाञ्छन्तोऽपि बहवो नानुसर्तुं प्रभवेयुः। वैदेशिकभाषाया एकोऽपि शब्दो न प्रयुज्येतेत्येषां प्रयासोऽभूत्। दूरभाषयंत्रस्य श्रवणोपकरणम् (रिसीवर) उत्थाप्यैव वयं सामान्यतः ''हलो'' इति निपातं प्रयुंज्महे। सोऽयं वैदेशिकः शब्द इति मन्वाना गिरिराजशास्त्रिणो न कदापि प्रयुञ्जते स्म तम्। ''हां जी'' ''कहिए'' इत्यादि पदान्येवोच्चारयन्ति स्म ते। ''भारत्याः'' ''प्रूफशोधनं क्रियमाणमस्ति'' इति सूचयितुं ते प्रूफशब्दं नोच्चार्य ''शोध्यपत्रम्'', ईक्ष्यपत्रं वा प्रयुञ्जते स्म, ''कंपोजिटर'' शब्दस्य स्थाने सर्वदैव ''अक्षरयोजकं'' पदं प्रयुञ्जते स्म। अद्य तु समग्रैः समाचारपत्रैः दूरदर्शनस्य विविधाभिः प्रसारिकाभिश्च (चैनल) यथा आङ्गलभाषामिश्रिताया हिन्द्याः प्रवर्तनं प्रारब्धम्, तद् दृष्ट्वा भाषासाङ्कर्यमस्मिन् देशे सुचिरस्थायि संजातमिति धारणा द्रढीभवति। आगामिनि काले गिरिराजशास्त्रिसदृशाश्चरित्रवन्तो जनाः केवलमितिहासगतं स्मृतिवस्तुरूपं यदि धारयेयुस्तर्हि न स्यादाश्चर्यम्। एवंविधा जनाः शतायुषो भूत्वाऽस्मांश्चिररात्राय स्वसान्निध्यं प्रयच्छेयुरित्येवाऽस्माकं प्रार्थना चराचरनियन्तुश्चरणयोः। किन्तु 2012 ईशवीयवर्षस्य मार्चमासे चतुर्दशे दिवसे (14/3/2012) गिरिराजशर्माणो दिवमारूढाः। तेषां पार्थिवशरीरस्य दाहो न विहितः किन्तु लोककल्याणभावनया परिवारजनैस्तस्य देहस्य दानं कस्मैचिदप्युपयोगाय कृतम्। निश्चितमेव यत्तेषां यशः शरीरोऽजरामरोऽस्ति। समर्प्यते श्रद्धाञ्जलिस्तेषां स्मृतये।

**सी-8, पृथ्वीराज रोड, सी-स्कीम, जयपुर**

# संस्कृतसमाचारः



आस्थासांस्कृतिकसंस्थाजयपुरद्वारा ऋषिपञ्चम्यवसरे राजस्थानसंस्कृतअकादमीसभागारे विद्वत्सम्मानसमारोहस्य आयोजनं कृतम्। समारोहे भारतीसम्पादकः प्रो. श्रीकृष्णशर्मा पद्मश्री डॉ. मण्डनमिश्रस्मृतिसम्मानेन, सहसम्पादकः प्रो. सुरेन्द्रकुमारशर्मा पं. मोतीलालजोशीस्मृतिसम्मानेन सहायकसम्पादकचरश्च डॉ. शिवचरणशर्मा पं. नवकिशोर काङ्करस्मृतिसम्मानेन सम्मानिताः। समारोहे अकादमीनिदेशकः श्रीसंजयझाला अपि पं. राधेश्यामव्यास-समाजसेवासम्मानेन सम्मानितः। सम्मानितविद्वत्सु अन्ये सन्ति प्रो. गणेशीलालसुथारः, प्रो. श्रीमतीसरोजकौशलः, श्रीमतीशशिप्रभास्वामी, डॉ. प्रवीणपण्ड्या, डॉ. चन्द्रप्रकाशशर्मा, डॉ. दयारामस्वामी, पण्डितपुनीतशर्मा, वैदिकः अमितशर्मा, श्रीरामकिशनसैनी, डॉ. अरविन्दकुमारः, श्रीविनोदकुमारशर्मा, पण्डितनवीनजोशी च।

– **डॉ. नाथूलालसुमनः**

# गाङ्गो ह्रद इवाक्षोभ्यः

❑ डॉ. राजेश्वरी भट्टः

मनोवाक्कायकर्मभी राष्ट्रहिते समर्पिताः परमश्रद्धेया आत्मीयतया च जनैर्दादाभाई इत्यभिधानेनाभिधीयमाना 'गिरिराजशास्त्रिमहोदया' विधिना राष्ट्रसेवायै एव अत्र प्रेषिताः। दधीचिकुलदीपका इमे गिरिराजमहोदयाः सर्वथा स्वनाम्नः सार्थकतां भजन्ते। एषाम् आचारविचार-व्यवहारेषु गिरिराजेन सदृशं स्थैर्यं दधीचेस्त्यागश्च परिलक्ष्यते। हिन्दूधर्मसंरक्षणाय धृत-शरीराणां संस्कृतिसंस्थापनाय श्वसताम् देववाण्याः संवर्द्धनाय प्रयतताम् दादाभाईमहोदयानां प्रत्यक्षदर्शन-स्यावसरो संस्कृतअकादम्या भवने पुरीपीठस्य जगद्गुरूणां ब्रह्मलीनानां प्रातःस्मरणीयानां शंकराचार्य-महोदयानां पुण्यस्मरणे समायोजितायां श्रद्धाञ्जलिसभायां मयाधिगतः। समारोहेऽस्मिन् दादाभाईमहोदया अतिथिमञ्चासीना उच्चस्वरेण भारतीय-संस्कृतिरक्षणाय सभासदः उदबोधयन्। आकृत्या नातिविशेषोऽयं कोऽपि निर्विशेषो भारतपुत्रोऽस्ति इति भावनाभरिताऽहं तान् प्रति श्रद्धावती जाता। अनन्तरं भारतीपत्रिकाया माध्यमेन, दादाभाईमहोदयैर्विरचितेन साहित्येन गोष्ठीषु सभासु च एभिरुक्तैर्वचनैश्च मया यज्ज्ञातं प्रत्यक्षीकृतं, अपर्याप्तं तद् पर्याप्तैर्वचनैः किञ्चित्किञ्चिद् भवतां समक्षमस्ति।

आयुर्वेदविशारदा दादाभाईमहोदयानां पूर्वजा आत्मनो विद्यावैशारद्येन परम्परया प्रशस्ताः प्रतिष्ठिताः मेवाड़नरेशैः सम्मानिता बभूवुः, कालक्रमेण मेवाड़-राजपुत्री तस्मिन् वंशे जातं आयुर्वेदविद्यायां लब्धप्रतिष्ठं 'शिवराम' महोदयं विवाहसमये जयपुरमानीतवती। ततो शिवराममहोदयस्य नैपुण्येनाभिभूतेन जयपुर-नरेशेनापि परिवारोऽयं भूरिदानेन मानेन च सत्कृतः। प्रशस्येऽस्मिन् वंशे कालेन 'आनन्दीलाल' दाधीचमहाभागानां गृहे वि.सं. 1978 वर्षे ज्येष्ठपुत्ररूपेण गिरिराजमहोदया जनिमलभन्त। क्रमेणाधीयमाना इमे शास्त्रिपरीक्षामुत्तीर्य शिक्षणकार्ये संप्रवृत्ता जाताः। सद्विकासाय छात्राणां कृते केवलं पुस्तकीयज्ञानं पर्याप्तं नास्ति इति विचार्य दादाभाईमहोदया व्यायाम-शिक्षकरूपेण कार्यं कुर्वन्तो यूनां मध्ये शारीरिक-सौष्ठवस्य महत्त्वं प्रत्यपादयन्। विद्यालयेषु शास्त्रविद्यया सह शस्त्रविद्यायाः प्रशिक्षणमप्यत्यावश्यकं वर्तते अस्य मतस्य पुष्ट्यै दादाभाईमहोदयाः प्रायः तिलकमहोदयेनोक्तं श्लोकमिमं प्रस्तुवन्ति-

**ग्रामे ग्रामे सभा कार्या ग्रामे ग्रामे शुभाः कथाः।**
**पाठशाला मल्लशालाः प्रतिपर्वमहोत्सवे।।**

राष्ट्रे नारीणामुपेक्षा दादाभाईमहोदयान् बलवत्पीड-यति। अविकसितं राष्ट्रस्यार्द्धाङ्गं कथं विकसितै राष्ट्रैः सह पदक्रमं करिष्यति। अनया चिन्तया ग्रस्ता दादाभाई 'दुर्गावाहिनीसंघटने' नारीणां प्रवेशाय दृढेन प्रयत्नवन्तो दृश्यन्ते।

राष्ट्रहिते आत्मना विहितैरल्पप्रयासैर्नातितुष्टा दादाभाई महोदया ततो राष्ट्रसेवासंकल्पमेकं मनसि निधाय राज्यसेवां विहाय, परिवारभारं पत्न्याः स्कन्धयोर्निधाय 'राष्ट्रियस्वयंसेवकसंघस्य' सदस्यताम् अङ्गीकृतवन्तः। तदनन्तरं 1950 तमे वर्षे इमे पूर्णतः भारतीपत्रिकाया कार्येषु संलग्ना जाताः। सदैव संघस्य गतिविधिष्वपि इमे मनागपि अस्तव्यस्ता नादृश्यन्त। स्वपरहितपरा दादाभाई

महोदया लोककल्याणेन सह आत्मकल्याणस्य कृतेऽपि पूर्णतः सावहिताः सन्ति। ईशवन्दनव्यायामलेख-पठनादीनां नित्यकर्मणामनुष्ठानमपि दादाभाई महाभागा सहजेनाविक्षुब्धेन मनसा सम्पादयन्ति सहैव राष्ट्रसेवा-संकल्पं क्षणमपि न विस्मरन्ति। अस्मिन् प्रसंगे एका घटना उल्लेखनीया वर्तते। त्रिमासपूर्वं 'दादाभाईमहोदया-नाम्' अस्वस्थतायाः समाचारान् श्रुत्वा अहं एषां कुशलं प्रष्टुं चिकित्सालये गतवती। भीषणग्रीष्मस्य समय एष आसीत्। तत्र स्थिता जना ग्रीष्मपीडिता अतिखिन्ना आसन्। विद्युद्व्यवस्थाया अवरोधेन व्यजनान्यपि निष्क्रियाण्यभवन् किन्तु दादाभाईमहोदयाः शिरसि गाढवस्त्रनिर्मितां कृष्णवर्णस्य टोपिकां धारयन्तोऽविचल भावेन शय्यायां लम्बमाना आसन्। अहं सहजभावेन तेषां शिरसः टोपिकां निवारयितुं तत्र स्थिताय जनाय न्यवेदयम्। सः पुरुषः तूष्णीभावेन तत्रैव स्थित आसीत्। ततोऽहं हस्ताभ्याम् टोपिकाया निवारणे उद्यता जाता। रुग्णावस्थया कृशोऽपि दादाभाई द्वाभ्यां हस्ताभ्यां टोपिकां गृहीत्वा माम् अस्मात् कर्मणः न्यवारयत्। दादा-भाईमहोदयस्यास्याचरणस्य रहस्यं ज्ञात्वा एषां अनन्यां राष्ट्रभक्तिं च दृष्ट्वाऽहं श्रद्धयान्विता जाता। तस्मै श्रद्धाञ्जलिमर्पयामि।

**सी-276, भाभामार्गः, तिलकनगरम्, जयपुरम्**

# श्रीगिरिराजशास्त्रिणोऽभिनन्दनम्

❑ आचार्यः डॉ. शिवसागरत्रिपाठी
राष्ट्रपतिसम्मानितः

समस्ते भारते राष्ट्रे शौर्यवैदुष्यकौशलैः।
सभाजितः प्रदेशोऽयं, राजस्थानेति विश्रुतः॥ 1॥
जयपुरपुरी रम्याऽपरा काशीति संस्तुता।
तत्रैव विबुधः श्रेष्ठः शास्त्रिवर्यो विराजते॥ 2॥
आनन्दीलाल-लालोऽयं दाधीचकुलभूषणम्।
सुनाम्ना गिरिराजोऽयं, शास्त्रव्यसनसंयुतः॥ 3॥
गिरिवद् दृढसंकल्पः, सुधीर्विज्ञो विचक्षणः।
संघटने पटुर्वाग्मी, संघभीष्मपितामहः॥ 4॥
श्रद्धाभक्तियुतः श्रीमान् 'दादाभाई' ति विश्रुतः।
रा.स्व. सं. शुचिकार्येषु संस्कृताय प्रचारणे॥ 5॥
मानवताप्रतिष्ठायां येन जीवनमर्पितम्।
विद्याविनयसम्पन्नः देववाणीसमर्चकः॥ 6॥
संस्थापिता पुरा येन 'भारती' मासपत्रिका।
अवतु यत्र कुत्रापि नूनं तन्मार्गदर्शकः॥ 7॥
संस्कृतभारतीपत्रमस्य कीर्तेर्निदर्शनम्।
इदं नियमतोऽनेन सम्पादितं प्रकाशितम्॥ 8॥
पूजिता नैकसंस्थाभिः सम्मानिताः पुरस्कृताः।
श्रद्धेयो नैष्ठिकः श्रीमान् श्रीगिरिराजशास्त्रिजिः॥ 9॥
सम्पादने प्रबन्धे च दक्षः ग्रन्थप्रकाशने।
साहित्येऽसौ समीक्षायां लेखने भाषणे पटुः॥ 10॥
भारत्यै देववाण्यर्थं स समर्पितजीवनः।
सम्प्राप्य दीर्घमायुष्यं पूज्यो हन्त दिवङ्गतः॥ 11॥
'भारती' पत्रिकाप्राणाः स्मर्यन्ते पाठकैः सदा।
जन्मशतीसमारोहे आत्मजनैः विशेषतः॥ 12॥
निधनानन्तरं तेन, देहदानं कृतं मुदा।
धन्येन माननीयेन, छात्राणां हितचिन्तया॥ 13॥
तपोमूर्तय एते तु स्वःस्थाः स्वस्थाः भवन्तु वै।
भवेयुः देवताः मन्ये गैर्वाणी-संघ-दीक्षिताः॥ 14॥

# शंसितव्रतः दादा-भाई

❑ प्रोफेसर बनवारीलालगौडः
पूर्व-कुलपतिः

**धार्मिकसंस्कारसम्पन्ने परिवारे जातः, किशोर-वयस्येव विवाहबन्धने सुबद्धः पारम्परिकेषु च सांसारिकेषु कर्मसु संनद्धः श्रीगिरिराजशास्त्री युवावस्थायाः प्रथमे सोपान एव ''राष्ट्रीय-स्वयंसेवक-संघेन'' क्रमशः सम्पृक्तः संसृष्टः संहृष्टः सम्प्रविष्टः संवलितः सुसंस्कृतः सञ्ज्ञातः। श्री-शास्त्रि-महोदयस्तु सङ्घप्रवेशानन्तरमेव ''दादाभाई'' इत्युपनाम सम्प्राप्तवानिति तु जानन्ति सङ्घे परिनिष्ठिता अन्येऽपि च बहवः जनाः। एतद्धि तज्जीवनम्। किञ्चित्किञ्चित्सम्पृक्तेन मया किञ्चित्प्रस्तूयते।**

धार्मिक संस्कार से संपन्न परिवार में उत्पन्न किशोर उम्र में ही विवाह-बंधन में सुबद्ध और पारम्परिक सांसारिक कर्मों में लगे हुए श्री गिरिराज शास्त्री दादाभाई युवावस्था के प्रथम सोपान में ही राष्ट्रीय स्वयंसेवकसंघ से क्रमशः संपर्क में आए, संसृष्ट (सम्मिलित) हुए, संहृष्ट (रोमांचित) हुए, उसके बाद प्रविष्ट हुए, संवलित अर्थात् मिश्रित भाव को प्राप्त, संघ की भावनाओं से सुसंस्कृत, संशित अर्थात् सर्वथा पूर्णता प्राप्त अथवा यों कहें कि तेज से युक्त, (वहीं भारती भवन में) संश्रित अर्थात् निवास किये हुए, सुसंहत (अत्यंत दृढ रूप में जुडे हुए), संविज्ञात अर्थात् पूर्णतः जाने हुये, शंसित (प्रशंसा प्राप्त), संसक्त (दृढ़तापूर्वक संघ से ही चिपके हुए) और अंत में तन्मय होकर (संघ से) एकाकार हो गये श्री-शास्त्रि-महोदय ने तो सङ्घप्रवेश के बाद ही ''दादाभाई'' यह उपनाम प्राप्त किया, यह तो संघ में परिनिष्ठित लोग जानते हैं और अन्य भी बहुत से लोग यह बात जानते हैं। यही उनका जीवन है। इसलिए उससे संबंधित वर्णन की यहां आवश्यकता नहीं है, फिर भी इस महात्मा के साथ कुछ कुछ संपर्क में आए हुए मेरे द्वारा कुछ प्रस्तुत किया जा रहा है।

**शुक्लवासाः शुचिः प्रियदर्शनः न केवलं स्वस्यां जातावेवापितु सर्वसमाजेषु लब्धप्रतिष्ठः मङ्गलवान् कार्यकरः तुष्टः स्मृतिमान् संस्कृतभाषायां समधि-गतविद्यः शास्त्रिपरीक्षोत्तीर्णः विधिकालज्ञः स्वतन्त्रः प्रतिपत्तिमान् श्रीगिरिराजशास्त्री गृहस्थ-धर्ममङ्गीकृतवान्। किन्तु किञ्चित् कालानंतरमेव स राष्ट्रियस्वयंसेवकसंघे प्राविशत्।**

सफेद वस्त्र धारण करने वाले, पवित्र, प्रियदर्शन वाले, केवल अपनी जाति में ही नहीं अपितु सर्वसमाज में लब्धप्रतिष्ठ, मंगलवान्, निरंतर कार्य करने वाले, संतुष्ट, स्मृतिमान्, संस्कृत भाषा में विद्या प्राप्त करने वाले, शास्त्री परीक्षा उत्तीर्ण किए हुए, विधि के विधान एवं काल को जानने वाले, स्वतंत्र बुद्धिमान् श्री गिरिराज शास्त्री ने गृहस्थ धर्म को अङ्गीकृत कर लिया। किंतु कुछ समय बाद ही वे राष्ट्रीय स्वयंसेवक संघ में प्रविष्ट हो गये।

**नियमितेन व्यायामेन कृतं सुसंहतं दृढञ्च शरीरं येन तादृग्विधं मल्लविद्यायां योगासनेषु च कुशलं स्वस्थं प्रातःकाले सन्ध्यावन्दने सुनिरतं प्राङ्मुख-मासीनं तथा मध्याह्ने सायङ्काले च समे शुचौ देशे सूपविष्टं ''गिरिराज शास्त्री'' इति प्रमुखनामधारकं तत्परावर्तकं सुगोपकं वा शुचिम् ''दादाभाई'' इत्युपनामधारकमव्यापन्नेन्द्रियं श्रीशास्त्रिणं दृष्ट्वा सर्वे जना आनंदमनुभवन्ति स्म। सौभाग्येनास्य महात्मनः दर्शनं भारतीभवने सर्वदा सर्वेभ्यः सुलभमासीत्।**

नियमित रूप से व्यायाम से कर लिया है सुगठित और दृढ़ शरीर जिसने इस तरह के उनको और मल्लविद्या में तथा योगासनों में कुशल, स्वस्थ, प्रातः काल में संध्यावन्दन में व्यस्त को, पूर्व की ओर मुख किये हुये को, बैठे हुए को तथा मध्याह्न में एवं सायङ्काल में सम

(समतल एवं व्यवस्थित) पवित्र स्थान पर अच्छी प्रकार से बैठे हुए 'गिरिराज शास्त्री' इस प्रमुख नाम को धारण करने वाले अथवा इस नाम से परावर्तक (विनिमय करने वाले, अदल-बदल करने वाले) अथवा इस नाम को अच्छी प्रकार से गुप्त रखने वाले पवित्र "दादा भाई" इस उपनाम को धारण करने वाले को, जिसकी संपूर्ण इंद्रियां अविकृत हैं ऐसे भी शास्त्री जी को देखकर सभी लोग आनंद का अनुभव करते थे। सौभाग्य से इस महात्मा के दर्शन भारती-भवन में सर्वदा सबके लिए सुलभ थे।

**युवावस्थायामेव सर्वदा सङ्घगणवेशालङ्कृतोऽयं वृद्धावस्थायामपि नेममत्यजत्, जयपुरस्थे भारतीभवने कृतनिवासः श्रीदादा-भाई सङ्घवेशसंसूचिकां कृष्णवर्णां टोपिकां धारयित्वैवेतस्ततः भ्रमणं करोति स्म, कदापि टोपिकाविरहितो ह्येषः महानुभावः केनापि कदापि भारतीभवनेऽथवाऽन्यत्र कुत्रापि नैव दृष्टः, स्वकक्षेऽपि विश्रामकाल एव टोपिकां निर्धारिते स्थाने निधायैव निश्चिन्तोऽयं शयनारूढो भवति स्म।**

युवावस्था में ही सर्वदा संघ के गणवेश से सुसज्जित इन्होंने वृद्धावस्था में भी इस गणवेश को नहीं छोड़ा, जयपुरस्थित भारती-भवन में निवास किए हुए श्री दादाभाई संघ के गणवेश को सूचित करने वाली कृष्ण वर्ण की टोपी को धारण करके ही इधर-उधर भ्रमण करते थे, कभी भी टोपी के बिना यह महानुभाव किसी के द्वारा भी कदापि भारती-भवन में अथवा अन्यत्र कहीं भी नहीं देखे गए, अपने कक्ष में भी विश्राम काल में ही टोपी को निर्धारित स्थान पर रखकर निश्चिंत ये शयनारूढ होते थे।

**गृहस्थोऽप्येषः महानुभावोऽभ्यवपातविरहित आसीत्। अभ्यवपातपरिभाषाप्रसङ्ग आचार्यश्चरको निर्दिशति यत्- मम मातृपितृभ्रातृदारापत्यबन्धुमित्रभृत्यगणो गणस्य चाहमित्यभ्यवपातः कालमभिजि-गीषीतः निरन्तरं कार्यनिरतस्यात्मवतः बुद्धिमतः श्री शास्त्रिणः मनसि क्लांतता शरीरे च श्रान्तताऽकाले कदापि न दृष्टे। अन्येषां सामान्यपुरुषाणां तथा शास्त्रिमहाभागानाञ्च केवलं तुल्यमूर्तितैवासीत्, कर्मसामर्थ्ये तु महदन्तरमासीत्। श्री-आप्टे महाभागाः कथयन्ति स्म यद् "एतत् कर्मकरणे श्रीगिरिराजशास्त्री समर्थो नास्ति" इति न चाचक्षीत।**

गृहस्थ होते हुए भी ये महानुभाव अभ्यवपातरहित थे **अभ्यवपात** पद की परिभाषा के प्रसंग में आचार्य चरक निर्देश करते हैं कि - माता, पिता, भाई, पत्नी, पुत्र, बंधु, मित्र, नौकर-चाकर ये सब मेरे हैं और मैं इन सब का हूँ, यह **अभ्यवपात** कहलाता है (ये इस प्रकार की भावना से रहित थे, निरपेक्ष थे) काल को जीतने की इच्छा रखने वाले, निरंतर कार्य में लगे रहने वाले, आत्मवान्, बुद्धिमान् श्री शास्त्री जी के मन में क्लान्तता (मानसिक थकावट) और शरीर में श्रान्तता (शारीरिक परिश्रम में होने वाली थकान) असमय में कभी भी नहीं देखी गई। अन्य सामान्य पुरुषों के तथा श्री शास्त्री जी के केवल शरीर ही समान थे (तुल्यमूर्तिता थी) अन्यथा कर्म के सामर्थ्य में भी बहुत अधिक अंतर था। श्री-आप्टे जी कहते थे कि "यह काम करने में श्री गिरिराज शास्त्री समर्थ नहीं हैं" ऐसा नहीं कहना चाहिए।

**आप्तस्वरूपाणां श्री-आप्टे महाभागानामनुयायी भक्त आज्ञापालकः तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयङ्कृती (स्वप्रज्ञया सङ्घसम्बन्धिकर्मसु प्रवृत्तः) स्वकीये दैनन्दिनकर्मण्यभ्यस्तः शुचिः सज्जोपस्करः प्रत्युत्पन्नमतिर्धीमान् व्यवसायी (व्यवसायी विषमावस्थास्वपि कर्म कुर्वन्न मुह्यति) विशारदः सत्यधर्मपरो विचक्षणः श्री दादा भाई शुभैः वाङ्मनःशरीरकर्मभिः श्रेयांसीच्छन् जीवनपर्यन्तं सङ्घकर्माण्येवाकरोत् अनुक्तदुरुक्तोहापोहलक्षणबुद्धियुक्तः धीमान् व्यवसायी च स विषमावस्थास्वपि**

**सङ्कार्यङ्कुर्वन्न मोहमधिगतवान् व्यवसायात्मिकां बुद्धिं च नैकशः प्रादर्शयत्।**

आप्तस्वरूपक श्री आप्टे जी के अनुयायी, भक्त, आज्ञापालक, पारमार्थिक, पारमार्थिकरूप से जान लिया है शास्त्र का अर्थ जिसने ऐसे तथा दृष्टकर्मा (कर्म को प्रत्यक्ष रूप से देखने वाले), अपनी बुद्धि से कार्य को करने वाले (अपनी बुद्धि से संघ से संबंधित कार्यों में प्रवृत्त होने वाले), अपने स्वयं के प्रतिदिन के कार्य को करने में अभ्यस्त अर्थात् अपना काम स्वयं करने में समर्थ, पवित्र, सभी आवश्यक उपकरणों से सुसज्जित, तत्काल आवश्यकता के अनुरूप उपयुक्त विश्लेषण करने वाली बुद्धि से युक्त, बुद्धिमान्, व्यवसायी (विषम अवस्थाओं में भी कर्म करता हुआ जो मोहित नहीं होता है), कार्य को करने में दक्ष, विद्वान् सत्य एवं धर्मपरायण, चतुर (विचक्षणः, स्पष्टदर्शी) श्री दादा भाई ने वाणी, मन एवं शरीर के शुभकर्मों के द्वारा कल्याण की इच्छा करते हुए जीवनपर्यंत संघ के कार्यों को ही किया। अनुक्त एवम् दुरुक्त में भी ऊहापोहलक्षणबुद्धियुक्त, धीमान् और व्यवसायी स्वरूप वाले उन्होंने विषम अवस्थाओं में भी सङ्घ के कार्यो को करते हुये मोह (कार्याकार्यविवेक में शून्यत्व) को प्राप्त नहीं किया तथा व्यवसायात्मिका बुद्धि (Professional skill) को अनेक बार प्रदर्शित किया।

**सङ्घप्रवेशानन्तरं प्रशिक्षितो निष्णातो दक्षो पूर्णरूपेण सङ्घकार्येषु दत्तचित्तश्च श्रीदादाभाई युवावस्थायामेव तृतीयाश्रमे प्राविशत्। यो विकटास्ववस्थास्वपि न मुह्यत्येतादृग्विधः प्रत्युत्पन्नमतिः संस्कृतज्ञो ह्ययं दर्शनशास्त्रेऽपि न केवलं विशारदः आसीदपित्वनुकर्ता व्याववहारिको ब्रह्मविदप्यासीत्।**

संघ में प्रवेश करने के बाद प्रशिक्षित निष्णात (विशेषज्ञ)एवं दक्ष तथा पूर्ण रूप से संघ के कार्यों में ही दत्तचित्त श्री दादा भाई ने युवावस्था में ही तृतीय आश्रम (वानप्रस्थाश्रम) में प्रवेश कर लिया। जो विकट अवस्थाओं में भी मोहित नहीं होता कार्याकार्यविवेक से शून्य नहीं होता, इस तरह में प्रत्युत्पन्नमति संस्कृतज्ञ ये दर्शनशास्त्र में भी न केवल निपुण थे अपितु उनका अनुकरण करने वाले व्यावहारिक स्वरूप वाले ब्रह्मविद् भी थे।

**एतेषां महाभागानां एक एव पुत्र आसीत्, मम परिचितः सोऽधिगतायुर्वेदशास्त्रः वैद्यगुणैर्युक्तः प्रयोगज्ञानविज्ञानसिद्धिसिद्धः सुखप्रदः वैद्यकर्मणि निरतः द्वात्रिंशत्तमात्मके वयस्येव दैवदुर्विपाकाद-कालकाल-कवलितः सन् दिवङ्गतः। तस्मिन् समयेऽहमपि संवेदनाप्रकटकरणप्रसङ्गे तृतीय-दिवसस्योपवेशन एतेषां महाभागानां गृहं गतवान्, तदा मया दृष्टं यच्चिन्ताभयत्रासमोहाः तथा धीविभ्रमः सत्त्वपरिप्लवश्च न कुत्रापि स्थिरचित्तेष्वेतेषु महाभागेषु समुद्भूताः, अबद्धवाक्त्वं शून्यहृदया-त्मकत्वञ्चापि सः न प्रकटितवान् तदा मया विचारितं यदान्तरिकरूपेण दुःखितोऽप्ययमदुःखित इव प्रतिभाति। अद्यापि स्मराम्यहं यदतीव प्रियपुत्रः सोऽतिस्नेहेन लालितः पालितः पोषितः ज्ञानपूर्वकमे-वायुर्वेदशास्त्रं पाठितः पुनरपि तस्मिन् समये कथं सुस्थिरचित्तः सञ्जातोऽयं योगी दादाभाई इति तु विचारणीय आसीत्। अस्य हेतुन्त्वनुमिनोम्यहं यत् ये हि प्रवरसत्त्ववन्तः क्लेशसहिष्णवः भवन्ति, ते प्रकटरूपेण कदापि न मुह्यन्ति।**

इन महाशय का एक ही पुत्र था मेरा परिचित था, आयुर्वेद शास्त्र को पढ़ लिया है जिसने ऐसा संपूर्ण वैद्य गुणों से युक्त प्रयोग, ज्ञान, विज्ञान में सिद्ध अर्थात् इन्हें जानने वाला एवं सिद्धियों में सिद्ध स्वरूप वाला, सुख प्रदान करने वाला, वैद्यकर्म में निरत वह 32 वर्ष की उम्र में ही दैवदुर्विपाक से अकाल में ही कालकवलित होता हुआ दिवंगत हो गया तथा उस समय मैं भी संवेदना प्रकट करने के प्रसङ्ग में तृतीय दिवस की बैठक में इन महाशय के घर गया, तथा मैंने देखा कि चिंता, भय, त्रास

(आतङ्कस्वरूपक भय, उद्वेग-स्वरूपक भय) तथा बुद्धि का विभ्रम, सात्त्विक भाव में कंपन या मन का चञ्चल होना इन स्थिरचित्त महानुभाव में कहीं भी उत्पन्न नहीं हुये, असम्बद्ध बोलना एवं हृदय में शून्यता (सम्यक् भावाभिव्यक्ति न होना) भी इन्होंने प्रकट नहीं किया तब मैंने विचार किया कि आंतरिक रूप से दु:खित होते हुए भी ये अदु:खित की तरह दिखाई देते हैं आज भी मैं स्मरण करता हूं कि अत्यंत ही प्रिय पुत्र वह अत्यंत स्नेह से लालन किया गया (लाड-प्यार किया गया), पालन किया गया, पोषित किया गया तथा ज्ञानपूर्वक ही आयुर्वेद-शास्त्र को पढ़ाया गया, फिर भी उस में ये योगी दादाभाई कैसे सुस्थिरचित्त हुए यह तो विचारणीय था इसका हेतु तो मैं अनुमान करता हूँ कि जो प्रवरसत्त्व वाले (श्रेष्ठ मन वाले) होते हैं वे क्लेशसहिष्णु होते हैं, वे प्रकट रूप से कभी भी मोहित (कार्याकार्यविवेकशून्य) नहीं होते हैं।

**आत्मवान् दादा-भाई परमार्थतः आस्तिक आसीत् (आस्तिक इति ''दत्तमस्ति हुतमस्ति परलोकोऽस्त्येवं'' मतिर्यस्य स आस्तिकः), अत एव स जानाति स्म यदत्र कर्म फलं चात्र ज्ञानं चात्र प्रतिष्ठितम्, अत्र मोहः सुखं दुःखं जीवितं मरणं स्वता (ममता) चाप्यत्रैव तथा शरीरपरम्पराप्रलयोदयाश्चा-प्यत्रैव प्रतिष्ठिताः सन्त्यत एव सहिष्णुत्वमेवात्रैता-दृशानां दुःखानामेकमात्रं प्रतिकारम्, अहो ज्ञानविज्ञानधैर्यस्मृतिसमाधिभिरेव सहिष्णुत्वमवाप्तं तेन महात्मना, ततस्तु पूर्णरूपेण सङ्घ एव समर्पितः सः जीवनपर्यन्तमेव ईर्ष्याशोकभयक्रोधमानद्वेषादीं-श्च पूर्ण-रूपेण त्यक्त्वा (यद्यपि पूर्वमप्येते बाधकाः नैवासन् पुनरपि) देशकालात्मविज्ञानानुरूपं सद्वृत्तस्यानुवर्तन-पूर्वकं जीवनयात्रायाः सफलता-पूर्वकं सञ्चालनं कृतवान्। सुप्तस्थितगतप्रेक्षिता-हारविहारप्रत्यङ्गचेष्टादिकेष्वारम्भेषु स्मृतिपूर्विकां प्रवृत्तिं कुर्वन् सः कस्यचिदप्यनिष्टं नैवाकरोत्।**

आत्मवान् दादाभाई पारमार्थिक रूप से आस्तिक थे (आस्तिक का तात्पर्य है ''दान किया हुआ है, हवन किया हुआ है, परलोक है'' इस तरह की मति जिसके है वह आस्तिक होता है), इसलिए वे जानते थे कि यहीं पर कर्महै, उसका फल यहीं पर है, यहीं पर ज्ञान प्रतिष्ठित है इसलिए यहाँ पर सहिष्णुता ही इस प्रकार के दु:खों का एकमात्र प्रतिकार है अहो! ज्ञान अर्थात् अध्यात्मज्ञान एवं विज्ञान अर्थात् शास्त्र का ज्ञान, धैर्य, स्मृति और समाधि इत्यादि के द्वारा ही सहिष्णुता प्राप्त की थी उन महात्मा दादा भाई ने, इसलिए इसके बाद भी पूर्ण रूप से संघ में ही समर्पित उन्होंने जीवनपर्यंत ही ईर्ष्या, शोक, भय, क्रोध, मान-अपमान, द्वेष इत्यादि को पूर्ण रूप से त्याग कर (यद्यपि ये पहले भी इन्हें बाधा नहीं पहुँचाते थे फिर भी) देश काल और आत्मस्वरूप को पूर्ण रूप से जानते हुए उसके अनुरूप ही सद्वृत्त के अनुवर्तनपूर्वक (परिपालनपूर्वक) जीवन यात्रा का सफलतापूर्वक संचालन किया सोने, बैठने, जाने (चलने), देखने, आहार-विहार एवं अंग-प्रत्यङ्गों की चेष्टा आदि के प्रारंभ करने में स्मृतिपूर्वक अर्थात् हित एवं अहित का विचार करने के बाद ही प्रवृत्ति को करते हुए उन्होंने किसी का भी अनिष्ट नहीं किया।

**यदाऽहं जयपुरस्थे राष्ट्रियायुर्वेदसंस्थाने निदेशकपद आसम्, तदा करुणार्द्रेणानेन बहवः रुग्णा आरोग्यलाभार्थं तत्र सम्प्रेषिताः। १९६१ तमे वर्षे यदाऽहं षोडशे कैशोरे वयस्यासं तदा महाशयेनानेन सह सङ्क्षिप्तः परिचयः सञ्जातः, विशिष्टस्तु परिचयः १९७५ तमे वर्षे सञ्जातः, सन्निकटता तु १९९२ तमे वर्षे सञ्जाता, तदनन्तरन्तु सप्तसु दशसु वा दिनेषु मिलनमावश्यकमिति तेषां निर्देश आसीत्। धन्योऽहं यदस्य महाभागस्य दर्शनं वारम्वारं नैकवारं कृतं मया।**

जब मैं जयपुरस्थित राष्ट्रीय आयुर्वेद संस्थान में निदेशक पद पर था तब करुणा भाव से ओतप्रोत इन्होंने

अनेक रोगी आरोग्य प्राप्ति के लिए वहां पर प्रेषित किए। सन् 1961 में जब मैं 16 वर्षीय किशोरस्वरूपक उम्र का था तब इन महाशय से संक्षिप्त परिचय हुआ, विशेष परिचय तो 1975 वें वर्ष में हुआ और निकटता तो 1992 ईस्वी में हुई उसके बाद तो 7 दिन या 10 दिन में मिलना आवश्यक था, ऐसा उनका निर्देश था मैं धन्य हूं कि इन महानुभाव के दर्शन मैंने बार-बार अनेक बार किए।

**अस्य महानुभावस्य मनस्युपादित्सा ( उपादान-स्य ग्रहणस्य इच्छा उपादित्सा ) नैवासीत्। केन्द्रीयसर्वकारे प्रधानमन्त्रिसहितैर्बहुभिर्मन्त्रिभिः सहैतस्य सन्निकटताऽऽसीत्, राजस्थानराज्य-सर्वकारस्य मन्त्रिणस्तु नतमस्तकाः सर्वदा महानुभावस्यास्याज्ञापालनार्थं सज्जीभूताः तिष्ठन्ति स्म, किंतु कदाप्यनेन स्वार्थं परिवारार्थं संबन्धिनाञ्च कृते न च किमपि वाञ्छितं, न च किमपि निर्दिष्टं, जनहितार्थन्तु वाञ्छितं निर्दिष्टं कारितमपि च। पदलिप्सा तु कदापि विचारसरण्येव न समागता, जिहासा ( हातुं त्यक्तुमिच्छा ओहाक् त्यागे धातुतः जिहासा पदस्य निष्पत्तिरेषा त्यागस्येच्छां संसूचयति ) त्वेतस्य महात्मनः मनसि वाचि कर्मणि च दृष्टा।**

इनके मन में किसी से कुछ भी ग्रहण करने की इच्छा नहीं थी केंद्र सरकार में प्रधानमंत्री सहित बहुत से मंत्रियों के साथ विभिन्न प्रदेशों में कार्यरत महामहिम राज्यपाल महोदय के साथ एवं विभिन्न मुख्यमंत्रियों के साथ उनकी सन्निकटता थी, राजस्थान राज्य सरकार के मंत्रिगण तो नतमस्तक होते हुए सर्वदा इनकी आज्ञा के पालन के लिए सज्जीभूत रहते थे, किंतु कभी भी इन्होंने अपने लिए, परिवार के लिए और संबंधियों के लिए कुछ भी नहीं चाहा, कुछ भी निर्दिष्ट नहीं किया, लेकिन जनहित के लिए तो इन्होंने इच्छा भी की, निर्देश भी किया और उन कार्यों को करवाया भी पदलिप्सा तो कभी भी इनके विचारों में आई ही नहीं, त्याग की इच्छा तो इस महात्मा के मन में, वचन में एवं कर्म में सर्वदा देखी गई।

**दादाभाई तु ज्ञानदानमैत्रीकारुण्यादिभावैः सन्नद्ध आसीत्, अध्ययनव्रतब्रह्मचर्यपरः शिष्टो धीरोऽप्ययमनुशासनप्रियः निर्भीकस्तेजसोपेतः लेखास्थवृत्तः स्पष्टवक्ता चासीदत एव पापवृत्तवचः सत्त्वाः सूचकाः कलहप्रियाः मर्मोपहासिनो लुब्धाः परवृद्धिद्विषः शठाः परापवादरतयश्चपला रिपुसेविनः निर्घृणास्त्यक्तधर्माणश्च नराधमा एतेषां समीप एव नैवागच्छन्ति स्म। वृद्धानां स्वभावज्ञो गतव्यथो ह्ययं स्वकीयायां युवावस्थायामतिथिव्रतः वृद्धोपसेवी चासीदत एव परम्परातः सङ्क्रान्ता सेवाऽनेनापि स्वकीयायां वृद्धावस्थायां सम्प्राप्ता। भारतीभवने सर्वैः पदाधिकारिभिः सम्मानितः दादा-भाई स्वयंसेवकैः महतीं शुश्रूषामधिगत्य २०१२ तमेऽब्दे पञ्चत्वं गतः। तस्मै नमः।**

दादाभाई तो ज्ञानदान मैत्री करुणा इत्यादि भावों से युक्त थे अध्ययन, व्रत ( प्रतिज्ञात का पालन ) एवं ब्रह्मचर्य का पालन करने वाले, शिष्ट, धीर एवं अनुशासन प्रिय ये निर्भीक, तेजस्वी, नियमों का परिपालन करने वाले और स्पष्ट वक्ता थे इसलिए ही पापाचरणपरक वचनों एवं मन वाले (मन में खोट रखने वाले), चुगलखोर, मर्मोपहास करने वाले, लोभी, दूसरे की उन्नति से द्वेष करने वाले, शठ ( चालाक, कपटी ), दूसरे का बुरा करने में लगे रहने वाले (दूसरे की निंदा करने वाले), चंचल, शत्रुपक्ष के लोग, कृपारहित एवं त्याग दिया है धर्म जिन्होंने ऐसे अधर्मी नराधम (नीच लोग) इन के समीप में ही नहीं आते थे। वृद्ध लोगों के स्वभाव को जानने वाले, नष्ट हो गई है वेदना ( कष्ट) जिनकी ऐसे ये अपनी युवावस्था में अतिथिव्रत का पालन करने वाले एवं वृद्धों की सेवा करने वाले थे, इसीलिए परम्परातः सङ्क्रान्त सेवा इन्होंने भी अपनी वृद्धावस्था में प्राप्त की। भारतीभवन में सभी पदाधिकारियों के द्वारा सम्मानित दादा भाई स्वयंसेवकों की अत्यधिक सेवाशुश्रूषा को प्राप्त करके सन् 2012 में पञ्चत्व को प्राप्त हो गए उन को प्रणाम।

# पारसमणिरिव दादाभाई

❑ डॉ. विनोदकुमारशर्मा

दादाभाई-इति नामस्मरणादेव तेजोमूर्तिनो उच्च-व्यक्तित्वस्य समाजायार्पितशरीरिण: साक्षादीश्वरस्यै-वांशरूपस्य विराट्स्वरूपस्य महापुरुषस्य सन्निधेराभासो भवति। बाल्ये वयसि एव तेषां प्रवासो गृहे आसीत्तदानीं तेषां यादृश: प्रेरक: सहजो निश्छलश्च व्यवहार: आसीत् स इदानीमपि अस्माकं परिवारस्य अमूल्यो निधिरिवा-स्ति। अग्रे गत्वा तु स एव पारसमणिरिव स्पर्श: नैकबालै-स्सहास्माकं जीवनस्यापि परिवर्तनस्य हेतुभूतोऽभवत्।

बाल्यकालस्य स्मरणावसरे आदर्शभूता ये महापुरुषा: स्मृतिपथमवतरन्ति तेष्वन्यतम: संरक्षकभूतो वात्सल्यमूर्ति: समाजाय सर्वसमर्पितात्मा च पूज्यवर्य्यो दादाभाई सदैवास्माकं मार्गदर्शनप्रदातृरूपेण सम्मुख-मायाति। सर्वशास्त्रविलक्षण:, आयुर्वेदविशारद:, संस्कृतप्रचारप्रसारसमर्पित:, भारती-गंगाधाराया भागीरथस्वरूप:, राष्ट्रसेवायामेवाहर्निशं दत्तावधानश्चायं सत्यमेव महर्षीतिरूपेण प्रतिष्ठित: आसीत्।

माननीयानां प्रवासावसरे बौद्धिकप्रसंगेषु एकस्या: कथाया: स्मरणमिदानीं भवति। कश्चन यवनमुनि: स्वीयमतावलम्बिजनानां दौर्बल्यं वीक्ष्य तेषां पराक्रमबुद्धिकामनाया वरं प्राप्तुं हिमालयमागत:। हिमगिरौ तपश्चर्यारतं महर्षिवरं प्राप्य तस्य सेवायां समर्पितो जात:। यवनमुनिसेवया सन्तुष्टो महर्षि: तस्मै वरं दातुमुद्यतो जात:। निर्देशं प्राप्य यवनमुनि: उक्तवान् यत् ''मम यवनजना: सबला भवेयुस्तदर्थं मन्त्रं ददातु'' इति। तस्य वचनं श्रुत्वा महर्षि: ''ह्रीम्'' इति बीजमन्त्रं दत्तवान्। ''ह्रीम्'' इति मन्त्रजपस्य वारं वारम् उच्चारणेन ह्रीम्, रीम् रीम् 'रहीम्' इति अप्रभ्रंश: जात:। यवना: बलिष्ठा अभवन्। पुन: स: यवनमुनि: यवनानां सर्वत्र साम्राज्यं भवेदिति कामनया हिमालयमागत्य तं महर्षिश्रेष्ठं प्राप्तवान्। महर्षि: उक्तवान् यद् अहं मंत्रं दत्तवान् तेन यवना बलिष्ठा अभवन्। पुन: भवानागत्य किमिच्छति? स: उक्तवान् यत् हे देव! भवान् सत्यं कथयति। भवता यो मन्त्र: प्रदत्त:, तस्य वारं वारं जपद्वारा यवना बलिष्ठा अभवन्। किन्तु इदानीं ते साम्राज्यं कर्तुं प्रयतन्ते। तदर्थं साफल्याय पुन: मन्त्रदानं करोत्विति प्रार्थये। पुन: स महर्षि: ''क्रीम्'' इति मन्त्रं दत्तवान्। ''क्रीम्'' इति मन्त्रस्योच्चारणेन वारं वारं जपद्वारा च क्रीम क्रीम करीम् 'करीम' इति अपभ्रंश: जात:। अनेन मन्त्रद्वयेन 'ह्रीम्'-'क्रीम्' इत्यनेन ते यवना: (रहीम करीम-इत्यपभ्रंशरी-त्योच्चारणेनापि) इदानीं विश्वे साम्राज्यं कुर्वन्ति, किन्तु वयं मन्त्रप्रदातार: सन्तोऽपि कथं दुर्बला जाता: इति चिन्ताया विषयोऽस्ति।

इतोऽपि ते सिंहशावकस्यैकां कथां बहुवारं श्रावितवन्त:। सिंहशावक: शृगालसमूहेन पालित: पोषितश्चात्मस्वरूपं सर्वथा विस्मृत्य शृगालवदेवात्मानं मन्यमानो वने विचरति स्म, उच्छिष्टं पशुमांसं च खादति स्म। एकदा कश्चन वनराज: सिंह: पशुवधोद्यत: शृगालसमूहे तं सिंहशावकं दृष्टवान्। कथमेष: सिंहपुत्र: शृगालवधं विस्मृत्य तैस्सह क्रीडति विचरति खादति चेति स: चिन्तयति। स: सिंह: रहस्यं ज्ञातुं तं सिंहपुत्रं बलेन गृह्णाति। सिंहपुत्रो रोदनं करोति यत् ''हे सिंह ! मां त्यज त्यज, नैव मारय मारय'' इति। सिंह: कथयति यत् भवान् तु सिंहपुत्र:, तर्हि कथं भयेन रोदनं करोति? इति। स: कथयति- ''नैव वनराज! अहं तु शृगालोऽस्मि। अहं तु वराक: शृगालपुत्रोऽस्मि'' इति। सिंह: तं स्वीकृत्य कूपनिकटं गत्वा उवाच यत् कूपमध्ये पश्यतु गर्जनं च करोत्विति। सिंहपुत्र: कूपे पश्यति, शनै: शनै: उच्चस्वरेण गर्जनं च करोति। अन्ते सोऽपि ज्ञातवान् यदहमपि सिंह

एव न तु शृगालः। एवमेवास्माकं हिन्दुजनानां स्थितिरस्ति। ते अमर्त्यस्य पुत्राः, जगदीश्वराः, विश्वमखिलमुद्धर्तुं समर्थाः, विश्वोपदेशकाः, सनातनाश्च सन्ति, तथापि आत्मस्वरूपं विस्मृत्य इतस्ततो वराका भ्रमन्ति। ते निजगौरवं संस्मृत्य यदा जागरूका भविष्यन्ति तदा निश्चयेन न केवलं भारतस्यापितु विश्वस्याखिलस्यैव समुद्धारो भविष्यति। दादाभाई-महोदयानां कथामाध्यमेन संस्कृतिसंस्कारप्रबोधनस्येयं शैली निश्चयेन सवार्थ-साधनसक्षमा आसीत्।

दादाभाईमहोदयाः संस्कृतप्रचारप्रसारकर्मणि सर्वदैव समर्पिता आसन्। नवाशीत्युत्तरैकोनविंशतितमे (1989 ई.) ईसवीयाब्दे सांगानेरनगरे मया एकं दशदिनात्मकं संस्कृतसम्भाषणशिविरमायोजितम्। शिविरसम्पन्नतावसरे दादाभाईमहोदयाः, दिल्लीतः समागता रामकुमारधानुकावर्य्याः, प्रो. हिन्दकेसरिवर्याश्च मान्या अतिथय आसन्। तदानीं दादाभाईमहोदयानां सम्बोधनं तादृशं प्रभावोत्पादकमासीद्यत्तेन प्रभाविता दशाधिका बालकाः अग्रे गत्वा बहूनि संस्कृतशिविराणि चालितवन्तः।

दादाभाईमहोदयेन सह एकवारं भोपालमध्ये समायोजितायां भारतसंस्कृतपरिषदः संगोष्ठ्यां गमनस्य सौभाग्यं प्राप्तम्। रेलयानेन यात्रा आसीत्। किंचिद्दूरं गत्वा दादाभाईजी हस्तमुखादिप्रक्षालनं विधायागत्य स्वीयासने ध्यानमुद्रायामुपविष्टा अभवन्। पुनश्च स्यूततः कृष्णमृत्तिकामादाय जलेन सम्मिश्र्य तया शिवलिंग-निर्माणं कृतवन्तः, तदुपरि स्यूतत एव निष्कास्य बिल्वपत्राणि च मन्त्रोच्चारणपुरस्सरं स्थापितवान्। अनन्तरं ध्यानं कृत्वा करमालिकाद्वारा जपविधानं च सम्पादितवान्। होराद्वयानन्तरं जपपाठादिकं यदा सम्पूर्णमभवत्तदा पुनः विल्पपत्राणि प्रक्षाल्य स्यूते स्थापितवान्, शिवलिङ्गं नत्वा तदपि पुनः, कृष्णमृत्तिकायां परिवर्त्य तदपि स्यूते स्थापितवान्। एतदखिलं पूजाविधानं मत्कृते महदाश्चर्यकरमासीत् कौतूहलकरमपि च। अतोऽहं दादाभाई-महोदयं पृष्टवान् यत् कथं रेलयाने एवं पूजाविधानं क्रियते? किमेतत् शास्त्रीयमिति। दादाभाईजी विहस्योक्तवन्तः यत् आम् एतदखिलं शास्त्रीयमेव। 'आपद्धर्मः' इति तु धर्मशास्त्रोक्तिरेवास्ति। वयं समाजकार्याय इतस्ततो भ्रमणं कुर्म एव। तदा कथमस्माकं पूजाविधानं भवेदतः एव वयं यादृश्यामप्यवस्थायां भवामस्तस्यामेवान्तरंगशुचिभावेन पूजाविधानं कुर्म इति। सत्यमेव दादाभाईमहोदयानां सन्निधिर्महर्षि-सन्निधिरिवासीत्।

दादाभाईमहोदयानां जीवनं गृहस्थप्रचारकेभ्य एव नापितु सर्वेभ्य एवादर्शभूतमासीदिति तु सर्वसम्मतं मतमस्ति। अनुकूलपरिस्थितयो भवन्तु प्रतिकूलस्थितयो वा, सर्वदैव मान्याः स्थितप्रज्ञस्य मूर्त्तरूपमिव प्रतिष्ठिता आसन्। केशवकल्पनाया आदर्शस्वयंसेवको दादाभाईजी सत्यमेव भारतमातुः सत्पुत्रः नन्दादीपमिव स्वजीवन-सर्वस्वं स्वाहेति कृत्वापि इतोऽपि किंचित् करणी-यमित्येव चिन्तयन् दृष्टिपथमागतः, सर्वदैव। पारिवारिककष्टानविगणय्यापि सर्वदैव भारतमातुः कष्टानां दूरीकरणाय हिन्दुजनसंघटनाय संघकार्ये हि सर्वतोभावेन सर्वस्वसमर्पणाय च समुद्यत आसीत्। सत्यमेवैतादृशा महापुरुषाः हि भारतभुवि जनिमवाप्य 'रत्नगर्भा वसुन्धरा' इत्याभाणकं सार्थकीकुर्वन्ति। मदीयं सौभाग्यमस्ति यद् बाल्यतः एव मान्यमान्या मम संरक्षकाः, संस्कृताय संप्रेरकाः, राष्ट्रसेवायै प्रेरकाश्चासन्। यदा कदापि हतधैर्यः भवामि तदा दादाभाईजी एव स्मृतिपथमागत्य मां प्रेरयन्ति मार्गं च बोधयन्ति। असंख्यानां बालमतीनां कृते संरक्षकरूपा दादाभाईजी सत्यमेव **पारसमणिरिवासन्** इदानीमपि च सूक्ष्मदेहेनास्माकमन्तिकस्थाः सन्तीति साक्षादनुभवामो वयमिति शमित्योम्।

**ज्योतिषविभागाध्यक्षः**
**ज. रा. राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्**

# सादगी और समर्पण की प्रतिमूर्ति पं. गिरिराज प्रसाद जी शास्त्री 'दादाभाई'

❑ कृष्ण कुमार शर्मा

ठीक ही कहा गया है कि राजा, महाराज, योद्धा, धनाढ्य आदि कितने ही व्यक्ति शिखर पर पहुँच कर यशस्वी कहलाने लग जायें, उनको भी लोग एक-न-एक दिन भुला ही देते है। लेकिन मानवीय दृष्टिकोण रखने वाले संवेदनशील समाजसेवियों को लोग लम्बे समय तक याद रखते है। दादाभाई भी एक ऐसी ही विभूति थे जिनका सानिध्य इन पंक्तियों के लेखक को लगभग 18 वर्ष तक मिला है। मैंने दादाभाई जी में ऐसे मानवीय गुणों को देखा है जिन्हें आमतौर पर लोगों में नहीं देखा जाता। उनके व्यक्तित्व और कृतित्व पर कलम चलाने की क्षमता और सामर्थ्य तो मुझमें नहीं है लेकिन अपने पारिवारिक सम्बन्धों के दौरान मेरा उनसे निरन्तर सम्पर्क रहा। उनसे भेंट के दौरान ही जो बातें हुई, उन्हीं के आधार पर उनके प्रति अपने भाव-सुमन व्यक्ति करने का यह विनम्र प्रयास है।

दादाभाई जी से मेरा प्रथम परिचय वर्ष 1994 में हुआ जब उन्होंने मुझे अपनी पौत्री के विवाह के प्रस्ताव के सम्बन्ध में अपने कार्यालय में बुलाया था। मिलते ही सबसे पहले उन्होंने मुझसे पूछा-क्या शाखा जाते हो? प्रत्युत्तर में मैने कहा कि हाँ, जाता हूँ और मेरे पास घटनायक का दायित्व भी है। इतना कहते ही वे प्रसन्न हो गये और कहने लगे कि अब मुझे कुछ नहीं पूछना। विधि के विधान और दादाभाई के शुभाकांक्षा से 8 दिसम्बर, 1994 को मेरा उनकी पौत्री से वैववाहिक सम्बन्ध हुआ। उनका पौत्री-दामाद बनना मेरे लिए परम सौभाग्य की बात रही।

दादाभाई जी जितने सरल और सात्विक विचारों के व्यक्ति थे उनका मस्तिष्क भी उतना ही मेघावी और प्रतिभावान् था। बौद्धिक प्रखरता और विलक्षणता का भार उनकी नैसर्गिक सरलता ही सह सकती थी। मानवीय गुणों से ओतप्रोत दादाभाई जी संघ के कार्यक्षेत्र में संलग्न रहते हुए संवेदनशीलता से जनसमस्याओं के निराकरण के प्रति सदैव सचेष्ट रहते थे। राजवैद्य के परिवार से सम्बन्ध रखने वाले दादाभाई जी ने संस्कृत की प्रवेशिका, उपाध्याय और शास्त्री की उपाधियां प्राप्त की। शिक्षा पूर्ण कर वे जयपुर के रथखाना स्कूल में संस्कृत पढ़ाने लगे।

वर्ष 1942 में वे जयपुर में ही स्वयंसेवक बन संघ से जुड़े, व्यायाम के शौकीन दादाभाई को संघ के खेल, सूर्य नमस्कार आदि बहुत रुचिकर लगते थे जिनके चलते वे संघ की सेवाओं में ही रम गये। निरन्तर व्यायाम, योगासन एवं ध्यान-साधना आदि के कारण उनकी नियमित दिनचर्या आजीवन संयमित रही।

दादाभाई जी की उपलब्धियों एवं सफलता के पीछे इनकी जीवनसंगिनी सौभाग्यवती श्रीमती गुलाब देवी का त्याग भी बहुत मायने रखता है। क्योंकि उन्होंने ही इनको संस्कृत एवं संस्कृति के प्रचार-प्रसार के लिए राष्ट्रीय स्वयंसेवक संघ को समर्पित किया और स्वयं तपस्विनी जैसा जीवन जीते हुए दादाभाई को समस्त गार्हस्थ्य के भार से मुक्त रखा।

पं. गिरिराज प्रसाद जी शास्त्री का नाम 'दादाभाई' यूं ही नहीं पडा। स्वाधीनता से पूर्व जयपुर रियासत में संघ पर प्रतिबन्ध था। अत: शाखाएं 'सत्संग' के नाम से लगती थी। प्रांत प्रचारक श्री बच्छराज व्यास ने सावधानी बरतने की दृष्टि से सभी प्रमुख कार्यकर्ताओं को उपनाम दे दिये थे। पं. गिरिराज जी को उन्होंने 'दादाभाई' नाम दिया। उसके बाद से उनका यही नाम प्रचलित हो गया और सभी उन्हें इसी नाम से जानने लगे। 'दादाभाई' ने वैयक्तिक जीवन में अपने अतुलनीय कृतित्व से इस नाम को बड़ी सहजता से सार्थक कर दिया।

'सादा जीवन और उच्च विचार' को साकार करने वाले दादाभाई जी सरल, सौम्य और शालीन व्यक्तित्व के धनी थे। सार्वजनिक जीवन में सफलता में उनकी विनम्रता और सज्जनता का बहुत बड़ा योगदान रहा है। उनसे चर्चा के

दौरान मैंने कई बार यह अनुभव किया कि किसी भी दुरूह विषय को भी सुगम बनाकर कह देना उनकी अभिव्यक्ति कला की विशेषता थी।

दादाभाई जी को अहम् छू तक नहीं पाया था। लोगों की मनोभावना को वे बखूबी जानते और समझते थे तथा सदा उनकी सहायता को तत्पर रहते थे। युवाकाल में उनके सम्पर्क में आये कई युवक शासकीय सेवा में बड़े अधिकारी, चिकित्सक, वैज्ञानिक, उद्योगपति और राजनेता बन कर पंचायत से लेकर उपराष्ट्रपति के पद तक पहुँच गये लेकिन उनके मन में कभी भी सत्ता, धन सम्पदा और लोकप्रियता की लालसा जागरित नहीं हुई। वे संघकार्य के माध्यम से राष्ट्र और समाज की सेवा के लिए दृढ़ संकल्पित थे। दादाभाई का कहना थी कि उन्हें राष्ट्रीय स्वयंसेवक संघ के पूर्व सरसंघ चालक श्री माधवराव सदाशिवजी गोलवलकर, बाबासाहब देवरस, प्रो. राजेन्द्र सिंह जी (रज्जु भैया), श्री एकनाथ जी रानाडे, श्री सुदर्शन जी, श्री माधवराव जी मुले, ब्रह्मदेव जी शर्मा और सोहनसिंह जी जैसे अनुभवी विद्वानों के साथ काम करने का जो अवसर मिला वह  उनका सौभाग्य था।

संस्कृत भाषा की मासिक पत्रिका 'संस्कृतरत्नाकर' करीब आधी सदी तक जयपुर से निरंतर प्रकाशित होती रही। इस पत्रिका ने संस्कृत के प्रकाशन क्षेत्र में जयपुर को विशिष्ट स्थान दिलाया, लेकिन वर्ष 1949 में जब 'संस्कृतरत्नाकर' का प्रकाशन जयपुर से काशी स्थानान्तरित हो गया तो इस अभाव की पूर्ति के लिए संघ के प्रमुख कर्णधार एवं संस्कृत विद्वान् बाबा साहेब आप्टे की आकांक्षा के अनुरूप संस्कृत पत्रिका के रूप में 'भारती' के प्रकाशन की योजना बनी। चूंकि दादाभाई जी को संस्कृति के पोषण और संस्कृत की परम्परा विरासत के रूप में परिवार से मिली थी इसलिए संस्कृत पत्रिका के प्रकाशन का दायित्व दादाभाई जी को सौंपा गया।वर्ष 1950 की दीपावली से शुरू हुई संस्कृत पत्रिका 'भारती' को परवान चढ़ाने में दादाभाई ने अथक परिश्रम किया। पत्रिका के प्रकाशन के लिए अर्थसंकट हुआ तो वित्त पोषण के लिए दादाभाई को देश भर में विभिन्न प्रान्तों का भ्रमण करना पड़ा। दादाभाई जी की मेहनत और सतत समर्पण के कारण ही पत्रिका निरन्तर निर्बाध रूप से प्रकाशित होती रही है।

यह मेरा सौभाग्य है जो मुझे दादाभाई जी जैसी महान् विभूति का सांनिध्य मिला जिन्होंने जीवन मूल्यों के प्रति प्रतिबद्ध रहते हुए समाज और राष्ट्र हित में अपने आपको समर्पित कर दिया। उनका कहना था कि आज ऐसे पथ-प्रदर्शक महापुरुषों का सर्वथा अभाव हो गया है। जिनके चरित्र और व्यक्तित्व से सम्पूर्ण राष्ट्र प्रभावित होता था। राष्ट्र निर्माण के लिए आज चरित्र निर्माण, सद्भाव और एकता की भावना को सुदृढ़ करने की सर्वाधिक जरूरत है। दादाभाई व्यथित मन से कहते थे कि मानव-धर्म और जीवन मूल्यों की अनदेखी के कारण ही आज मनुष्य में समाज के दूसरे लोगों का शोषण करने की प्रवृत्ति पनपी है। आज स्वार्थ और सुख-साधनों के प्रति लालायित रहने की लालसा इतनी प्रबल हो गई है कि इससे ग्रसित लोग चरित्र, नैतिकता, कर्तव्यनिष्ठा, संवेदनशीलता आदि गुणों से विमुख होते जा रहे हैं।

दादाभाई जी के अनुसार भारतीय संस्कृति समस्त मानवीय सद्गुणों की समन्वयात्मक समष्टि है क्योंकि इसमें जहाँ 'सर्वे भवन्तु सुखिन:' का शंखनाद है, वहीं 'वसुधैव कुटुम्बकम्' की कल्याणकारी भावना का समावेश भी है। इसमें एक ओर 'सत्यमेव जयते' का अटूट विश्वास और अडिग संकल्प है वहीं दूसरी ओर 'अहिंसा परमो धर्म:' को इस धरती की धुरी मानकर समस्त प्राणियों की रक्षा का आह्वान है।

यह दादाभाई जी की सरलता, सहृदयता और विनम्रता ही थी जिसने उन्हें स्वयंसेवक संघ के मंच पर ही नहीं बल्कि संस्कृत और संस्कृति के क्षेत्र में भी लोकप्रिय बनाया। मानवीय गुणों और संवेदनशील स्वभाव के कारण ही वे लोगों का दिल जीतकर उनके लिए प्रेरक और प्रेरणापद बने। सर्वथा निरभिमानी, सत्य के पक्षधर, संस्कृत-संस्कृति के लिए सतत समर्पित दादाभाई जी को शत-शत नमन।

**डी-74, विधानसभा नगर,**
**पत्रकार कॉलोनी के पास, मानसरोवर, जयपुर**

# प्रेरणा के स्रोत 'दादाभाई'

❑ श्याम सुन्दर बिस्सा

राष्ट्रीय स्वयं सेवक संघ से सम्बद्धजन के प्रेरणापुंज, संस्कृतसाहित्य के पुरोधा स्वनामधन्य दादाभाई गिरिराज शास्त्री जी के जीवन एवं परिचय के इतने रूप हैं कि विशिष्टता का निश्चय करना अति दुरूह है। वैसे तो दादाभाई के बारे में उस समय से सुन रखा था जब अध्ययनार्थ जैसलमेर से जयपुर आगमन हुआ किन्तु निकटता से परिचय उस समय हुआ जब मैं केन्द्रीय कारागृह जयपुर के अधीक्षक पद पर पदस्थापित हुआ। उस समय प्रशासनिक अधिकारियों के मिलने की एक व्यवस्था प्रतिमाह उनके घरों पर जाकर मिलने की चल रही थी। उस प्रसंग में भारती भवन जाना होता ही था। उनसे हुई प्रथम भेंट के समय की उन्मुक्त हास्य छवि मुझे अभी भी स्मरण है। इतना खुलकर सुस्पष्ट शब्दों में सरलता के साथ वार्ता करते करते सरल निश्छल हंसी से सभी को प्रभावित करने का उनका विशिष्ट गुण अनायास ही किसी वर्षों पुरानी निकटता का अनुभव कराता था। भोजन के समय उनके द्वारा कही गई बातें एवं खाद्य सामग्री की महत्ता एवं सुस्वादुता पर उनका विश्लेषण उस समय उनके साथ बैठे लोगों को आत्मिक सुख प्रदान करता था।

संघ कार्य में उनकी गहरी प्रतिबद्धता का आकलन इस बात से सुस्पष्ट होता है कि संघ कार्य के लिये उन्होंने गृहस्थ होकर वानप्रस्थी योगी का जीवन जीना अंगीकार किया। संस्कृत भाषा में प्रकाशित होने वाली **भारती** मासिक पत्रिका के श्रम साध्य प्रकाशन कार्य को लगभग 6 दशक तक अपने शब्दों में जीवंत बनाए रखा। प्रकाशन की धारा अवरुद्ध न होने पाए इसके लिये देशभर में अथक परिश्रम के साथ सीमित साधनों से यात्राएँ करते रहे। इतना ही नहीं इसके साथ स्वयं मौलिक संस्कृत लेखन में भी संलग्न रहे- उनका **भारतभक्तिस्तोत्रम्, लघु- कथासंग्रह, गौरवकथा** आदि संस्कृत साहित्य की अमूल्य निधि है। संघगीत एवं अध्यात्म शिवाय नमः आदि का संपादन करके भी आपने अनगिनत संस्कृतानुरागियों को लेखन और संपादन में उन्होंने मार्गदर्शन प्रदान किया है।

दादाभाई का स्मरण करते हुए मैं एक व्यक्तिगत घटना का उल्लेख करने का लोभ संवरण नहीं कर सकता। मेरे भारतीय प्रशासनिक सेवा में चयन होने पर वे अति प्रसन्नता के साथ कारागार परिसर स्थित उप महानिरीक्षक कारागार के राजकीय आवास पर पधारे। भोजनोपरांत चयन की प्रसन्नता के साथ चेतावनी स्वरूप संदेश भी दिया कि ''कहीं भी चयन हो, है तो नौकरी'' इसके रहते मन का काम कर सकोगे? राज से मुक्त होकर समाज के लिये कार्य करने हेतु कब आओगे। काश उनके जीवन काल में ऐसा हो पाता किन्तु उनका आदेशात्मक संदेश सदैव पाथेय रहेगा।

संस्कृत साहित्य के पुरोधा, सच्चे कर्मयोगी, संघ परिवार के मार्गदर्शक प्रेरणापुंज श्रीयुत आचार्य दादाभाई गिरिराज शास्त्री जी के जन्म शताब्दी वर्ष के अवसर पर शताब्दी अंक प्रकाशित करने का निर्णय सचमुच ही उनके लिये आत्मिक श्रद्धांजलि है। शतशः नमन-

**आई.ए.एस. (से.नि.)**
**हरीशचन्द्र माथुर**
**राजस्थान राज्य लोक प्रशासन संस्थान, जयपुर**

# कीर्तिर्यस्य स जीवति

( श्रीगिरिराज-पञ्चविंशतिका )

❑ प्रोफेसर सुरेन्द्रकुमारशर्मा

दाधीचाः ब्राह्मणाः केचन बूभवुर्द्विजपुङ्गवाः।
स्वक्षेत्रे ख्यातकर्माणो विद्वांसो वंशभास्कराः।।1।।
तेष्वेव प्रथिताश्चैके हृषिकेशाह्वयाः बुधाः।
नैकत्र राजसम्मान्या आसन् सिद्धाः भिषग्वराः।।2।।
दिल्लीतस्ते समायाताः पृथ्वीराजसुताऽऽदृताः।
मनस्विनोऽथ मेवाडे महाराणाऽतिमानिताः।। 3।।
तेषामेव कुले जाताः शिवरामेति विश्रुताः।
आयुर्वेदविदां श्रेष्ठाः कुशलाश्च चिकित्सकाः।।4।।
तेऽपि जयपुरं प्राप्ताः महाराणासुताऽऽग्रहात्।
राजसम्मानिताश्चात्र विविधोपाधिभूषिताः।। 5।।
हरिनारायणाचार्याः बभूवुस्तत्कुलोद्भवाः।
'मुखिया' पदेऽभिषिक्ताः ये राजभिः पूजिताः बुधाः।।6।।
गोविन्दप्राङ्गणस्थेऽस्मिन् गङ्गागोपालमन्दिरे।
ख्याताः भागवतास्ते च ह्यासन् विद्वत्प्रवाचकाः।।7।।
तेषां सुतोऽभवन्नाम्नाऽऽनन्दीनारायणः कृतः।
पितुरनन्तरं सोऽपि सिक्तश्च "मुखिया" पदे।। 8।।
भक्त्या बभार दायित्त्वं श्रद्धाभावसमन्वितः।
विद्वत्पितुः सकाशाद्योऽधीतविद्यः पुराणवित्।। 9।।
शैशवानन्तरं जातो धर्मपारायणो गृही।
पुत्रकामः स सञ्चस्के गिराराजप्रदक्षिणाः।। 10।।
तत्प्रभावात् प्रजातो हि कोऽप्यसौ शिशुरद्भुतः।
सत्संस्काराग्रदूतो यः सञ्जातः कुलदीपकः।। 11।।
गिरिराजकृपालब्धः प्रसादः कृतिना मतः।
'गिरिराज' स्ततः पित्रा तन्नामकरणं कृतम्।। 12।।
शैशवेऽभ्यस्तविद्यो यः संस्कारैः संस्कृतोऽभवत्।
प्रजायै गृहमेधी सः त्यागभावानुभावितः।। 13।।
शास्त्रिकक्षास्वधीयानोऽसहयोगात्मके ततः।
आन्दोलने क्रियाशीलो राष्ट्रसेवाव्रती शुचिः।। 14।।
नायमात्मा सुलभ्योऽत्र बलहीनेन देहिना।
व्यायामेऽपि प्रवृत्तोऽभून्मल्लविद्यापरायणः।। 15।।
संघशाखाप्रवेशोऽस्य ततो जातः स्वभावतः।
प्रचारकत्पकं तत्र निर्व्यूढं तेन नैकशः।। 16।।
राजसेवापरित्यागो गेहत्यागस्तपस्विनः।
सेवाव्रतैकनिष्ठस्य श्लाघनीयस्ततोऽभवत्।। 17।।
आप्टेमहोदयानां यो निर्देशमनुपालयन्।
संस्कृतस्य प्रचाराय प्रसाराय च तत्परः।। 18।।
नवीना "भारती" नाम्ना संस्कृतमासपत्रिका।
प्रकाशने समानीता सोद्योगञ्च मनीषिणा।। 19।।
संस्थापकसदस्योऽयं पत्रिकायाः प्रकाशने।
सोत्साहं निष्ठया लग्नो यावज्जीवं समर्पितः।। 20।।
तत्फलं पत्रिका सेयं सप्ततिवत्सरावधौ।
निर्बाधञ्च यथाकालं सातत्येन प्रकाशते।। 21।।
योगी सन्ध्याविधेः कर्त्ता मनस्वी दृढनिश्चयी।
संस्कृतस्य समाजस्य राष्ट्रस्य च हिते रतः।। 22।।
कार्यं वा साधयेयं वा पातयेयं शरीरकम्।
लक्ष्यमेतद् विनिर्धार्य ध्येयसाधनतत्परः।। 23।।
"दादाभाई" ति सिद्धाय कूटनाम्नेऽभिवन्दनम्।
शताब्द्यां जन्मनस्तस्य श्रीगिरिराजशास्त्रिणे।। 24।।
अद्यापि प्रेरयन्नस्मान् लक्ष्यते नोऽनुभावितः।
सत्यं मनीषिभिः प्रोक्तं कीर्तिर्यस्य स जीवति।।25।।

सहसम्पादकः भारतीपत्रिकायाः
निदेशकचरः राजस्थानसंस्कृतशिक्षाविभागस्य
राजस्थानसंस्कृतअकादम्याश्च

# स्मरणाञ्जलिः

❑ डॉ. नाथूलालसुमनः

राजस्थानक्षेत्रे संस्कृतपत्रकारतायाः पुरोधसः स्वरक्तेन स्वेदबिन्दुभिश्च मरुसिकतासु आजीवनं भारतीसेचकाः सुरभारतीसेवकाः आजीवनप्रचारकाश्च मरुधरायां राष्ट्रीयस्वयंसेवकसंघवटस्य बीजवपनादारभ्य विविधदायित्वानि निर्वहन्तः मृत्युपर्यन्तं दैनन्दिप्रार्थना-व्रतपालकाः पूज्याः दादाभाईमहोदयाः नैकेषां कार्यकर्तॄणां संस्कृतसमुपासकानाञ्च प्रेरका मार्गदर्शकाश्च आसन्। राष्ट्रीयस्वयंसेवकसंघस्य प्राथमिकशिक्षावर्गे 1975 तमे ख्रिस्ताब्दे जयपुरे दादाभाईमहोदयं प्रथमवारम् अहं दृष्टवान्। अस्मिन् वर्गे अहं शिक्षार्थी आसम्। तदानीम् एकस्मिन् दिवसे दादाभाईमहोदयस्य प्रेरकं बौद्धिकं श्रोतुम् अवसरः प्राप्तः। तदनन्तरं शेखावाटीक्षेत्रे मया राजकीयसेवावधौ दादाभाईमहोदयस्य प्रवासकाले नैकवारं तेषां सान्निध्यं प्राप्तम्। जयपुरे भारतीभवनेऽपि अनेकशः तेषां सत्सङ्गमहं प्राप्तवान्। तेषां प्रेरकव्यक्तित्वस्य दर्शनेन उद्बोधनेन च सर्वदैव अहं कृतकृत्यो जातः।

कार्यकर्तॄणां मार्गदर्शनं साहाय्यं च कथं करणीयं तस्य का आवश्यकता अस्ति इति तु दादाभाईमहोदयाः सम्यक्तया जानन्ति स्म। राजस्थानसंस्कृतअकादमी-निदेशकस्य दायित्वनिर्वहने तु दादाभाईमहोदयैः पदे पदे मम मार्गदर्शनं कृतं सम्बलं च प्रदत्तम्।

भारतीभवने तेषां दर्शनार्थम् आगन्तुकानां सम्मुखं ते प्रसंगानुरूपं संस्कृतस्य, योगस्य, आयुर्वेदस्य, विविधशास्त्राणां भारतीयमनीषिणाञ्च महत्त्वं प्रतिपादयन्ति स्म। एकदा सूर्यनमस्कारस्य विषये ते उक्तवन्तः यत् बीजाक्षरयुक्तमन्त्रैः सह सूर्यनमस्कारेण व्यायामस्तु भवत्येव सूर्योपासनापि भवति। पञ्चविंशति-सूर्यनमस्काराणां क्रममेवमुक्तवन्तः -

**ध्येयः सदा सवितृमण्डलमध्यवर्ती,**
**नारायणः सरसिजासनसन्निविष्टः।**
**केयूरवान् मकरकुण्डलवान् किरीटी,**
**हारी हिरण्मयवपुर्धृतशंखचक्रः।।**

1. ॐ ह्रां मित्राय नमः 2. ॐ ह्रीं रवये नमः 3. ॐ ह्रूं सूर्याय नमः 4. ॐ ह्रैं भानवे नमः 5. ॐ ह्रौं खगाय नमः 6. ॐ ह्रः पूष्णे नमः 7. ॐ ह्रां हिरण्यगर्भाय नमः 8. ॐ ह्रीं मरीचये नमः 9. ॐ ह्रूं आदित्याय नमः 10. ॐ ह्रैं सवित्रे नमः 11. ॐ ह्रौं अर्काय नमः 12. ॐ ह्रः भास्कराय नमः 13. ॐ ह्रां ह्रीं मित्ररविभ्यां नमः 14. ॐ ह्रूं ह्रैं सूर्यभानुभ्यां नमः 15. ॐ ह्रौं ह्रः खगपूषभ्यां नमः 16. ॐ ह्रां ह्रीं हिरण्यगर्भ-मरीचिभ्यां नमः 17. ॐ ह्रूं ह्रैं आदित्यसवितृभ्यां नमः 18. ॐ ह्रौं ह्रः अर्कभास्कराभ्यां नमः 19. ॐ ह्रां ह्रीं ह्रूं ह्रैं मित्ररविसूर्यभानुभ्यो नमः 20. ॐ ह्रौं ह्रः ह्रां ह्रीं खगपूषहिरण्यगर्भमरीचिभ्यो नमः 21. ॐ ह्रूं ह्रैं ह्रौं ह्रः आदित्यसवित्रर्कभास्करेभ्यो नमः 22. ॐ ह्रां ह्रीं ह्रैं ह्रूं ह्रौं ह्रः मित्ररविसूर्यभानुखगपूषभ्यो नमः 23. ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः हिरण्यगर्भमरीच्यादित्यस-वित्रर्कभास्करेभ्यो नमः 24. ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः मित्ररवि-सूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करे-भ्यो नमः 25. ॐ श्रीसवितृसूर्यनारायणाय नमः

**आदित्यस्य नमस्कारान्, ये कुर्वन्ति दिने दिने।**
**आयुष्प्रज्ञा बलंवीर्यं, तेजस्तेषां च जायते।।**

एवं प्रकारेण 25 सूर्यनमस्काराः प्रतिदिनं करणीयाः। लक्ष्यसमर्पितजीवनाः आपादमस्तकं वेशभूषाद्वारा व्यवहारेण संस्कृतनिष्ठभाषया च हिन्दुत्वनिष्ठाः अन्यभाषाशब्दानां संस्कृतनिर्वचनपटवः मान्याः दादाभाईत्युपाख्याः श्रीगिरिराजशास्त्रिणः यद्यपि अधुना ब्रह्मसायुज्यं प्राप्तवन्तः तथापि अस्माकं मध्ये यशःकायेन जीवन्ति। अन्ते च श्रीमद्भिः श्रीधरभास्कर-वर्णेकरमहोदयैर्लिखितस्य दादाभाईद्वारैवानूदितस्य च **अध्यात्मशिवायनस्य** इदं पद्यं तेषां चरणारविन्देषु प्रणतिपूर्वकं समर्पयामि-

**एतस्मिन् भारते वर्षे, राष्ट्रकार्यधुरन्धरः।**
**भवादृशो न कोऽप्यन्यः, कर्मयोगप्रवर्तकः।।**

उपाध्यक्षः
भारतीयसंस्कृतप्रचारसंस्थानम्

# 'क्षीयन्ते चास्य कर्माणि' इत्यस्य समीक्षणम्

❑ प्रोफेसर प्रभावती चौधरी

**परिचयः** - भारतीयसंस्कृतेरद्वितीयं वैशिष्ट्यम् अध्यात्मम्। एतदर्थं धर्म-अर्थ-काम-मोक्षरूपपुरुषार्थ-चतुष्टये मोक्ष एव परमप्रयोजनरूपेणोपस्थापितः मानवजीवनस्य। नवाधिकानि दार्शनिकप्रस्थानानि अलंकुर्वन्ति भारतीयसंस्कृतेः दार्शनिकपरम्पराम्। कर्मसिद्धान्तः एतस्याः मूलमस्ति। **'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमिति'** कर्मसिद्धान्तस्य मूलमन्त्रोऽस्ति। लोकायतं विहाय अन्यानि दार्शनिकप्रस्थानानि पुनर्जन्म (मृत्योरनन्तरं पुनर्जीवनं कर्मफलभोगाय) स्वीकुर्वन्ति।

**प्रयोजनम्-श्रुतेः वचनमेतत्-**

**भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।**
**- मुण्डकोपनिषद्, 2.2.8**

श्रुतेर्निर्दिष्टः एष कर्मक्षयः सर्वेषां कर्मणामुत वा एकस्य द्वयोरेव वा इत्यत्र जिज्ञासा भवति। तत्त्व-साक्षात्कारः कारणं, कर्मक्षयः कार्यं, मोक्षः तस्य फलमिति प्रतिपत्तिरपि जायते। अस्मिन् विषये विदुषां नैकमत्यम्। प्रारब्धस्य भोगेनैव नाशः स्वीकृतः विविधप्रस्थानेषु। परन्तु यथा प्रारब्धस्य भोगेन नाशे प्रामाण्यं तथैव ज्ञानेनापि। मोक्षस्वरूपं किमस्ति, मोक्षः ज्ञानसाध्यः कर्मसाध्यः उत वा ज्ञानकर्मोभयसाध्यः। अत्रापि नैकाः शंकाः प्रादुर्भवन्ति। आलेखेऽस्मिन् एतदेव समीक्षणीयम्।

**पाठ्यसामग्री** - शोधालेखस्यास्य कृते न्याय-मंजरी-योगवासिष्ठ-श्रीमद्भगवद्गीता-ब्रह्मसूत्र-उपनिषद्-तत्त्वार्थसूत्र-विवेकचूडामणि-अपरोक्षानुभूति-समयसार-धम्मपद-विज्ञानविद्युत्-ब्रह्मसिद्धान्त-शारीरकविज्ञान-प्रभृतयः ग्रन्थाः अधीताः। एतदर्थं सममेतद्विषयकः बहुशः विचारोऽपि जातः।

**विषय :** 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' मुण्डकोपनिषदः वचनमेतत् ज्ञानाधिगमात् कर्मक्षयं कथयति। श्रुतौ प्रयुक्तः बहुवचनप्रयोगः सर्वेषां कर्मणां क्षयमभिधत्ते। परन्तु **अध्यात्मोपनिषदि** विरुद्धवचनमपि प्राप्यते-

**ज्ञानोदयात्पुरारब्धं कर्म ज्ञानान्न नश्यति।**
**अदत्त्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत्।। (53-54)**

ज्ञानात् प्रारब्धनाशः निराकृतः श्रुत्या। यथा लक्ष्यीकृत्य उत्सृष्टः बाणः स्वलक्ष्यं भित्त्वैव शमयति, तथैव प्रारब्धः स्वफलं प्रकाश्यैव नश्यति। यत् कर्म फलोन्मुखमस्ति तदेव **'प्रारब्ध'** इति कथ्यते। अत एव तत्त्वज्ञानात् तस्य नाशः न जायतेऽपितु भोगेनैव। 'प्रारब्धस्य भोगेनैव नाशः' इति अनेकेषां विदुषां मतम्। तन्मते तत्त्वज्ञानात् संचितक्रियमाणयोरेव क्षयः, न तु प्रारब्धस्य।

वस्तुतः प्रारब्धस्य तथा तत्त्वज्ञानात् प्रक्षये श्रुतिप्रामाण्यं तथैव भोगादपि तेषां प्रक्षयः शास्त्रप्रामाण्या-देवावगतः भवति। अस्मिन् विषये मतवैविध्यं न्याय-मंजरीकारेणाचार्य**जयन्तभट्टेन** स्वकीये ग्रन्थे अपवर्ग-निरूपणक्रमे प्रतिपादितम्-

'अन्ये त्वाचक्षते' - किमनेन भोगायासेन, अदत्तफलान्येव कर्माणि योगिनः नंक्ष्यन्ति। तत्त्वज्ञानस्यैव

भगवतः इयान् प्रभावः यस्मिन्नुत्पन्ने चिरसंचितान्यपि कर्माणि सहसैव प्रलयमुपयान्ति। भोगादपि तेषां प्रक्षयः शास्त्रप्रामाण्यादेवावगतः। तथा तत्प्रामाण्यादेव तत्त्व-ज्ञानादपि तत्प्रक्षयं प्रतिपत्स्यामहे। यथा चोक्तं गीतायाम्-

**यथैधांसि समिद्धोऽग्निः भस्मसात् कुरुतेऽर्जुन।**
**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा।।**

**- गीता, 4.37**

नेदं श्रद्धामात्रं, वेदविदामग्रगण्येन व्यासमुनिनैव समभिधानात्। अन्ये विद्वांसः निराकुर्वन्ति मतमेतत्। तेषां खण्डनमपि प्रतिपादितं **न्यायमंजरीकारेण-**

'तदन्ये न मन्यन्ते, न सर्वात्मना कर्मणां दाहः। किन्तु स्वरूपेण सतामपि सहकारिवैकल्यात् स्वकार्यकारणो-दासीनता तेषां भवति, भ्रष्टानामिव बीजानामंकुरकरण-कौशलहानिः। यतः सामग्री कार्यस्य जनिका न केवलं कारकम्। अतो न कर्माण्येव केवलानि फलोपभोगयोग्य-शरीरेन्द्रियादिजन्मनिमित्ततामुपयान्ति किन्तु मिथ्याज्ञानेन दोषैश्च सहितानि'।

ज्ञानकर्मसमुच्चयवादिनः ज्ञानकर्मसमुच्चयान्मोक्षं मन्यन्ते। तेषां मते-अविद्यातृष्णे धर्माधर्मौ च जन्म-कारणम्, मोक्षस्य दुर्लभत्वं, ज्ञानाग्निदाहवचनं तु ज्ञानप्रशंसार्थमेव। सोऽयं ज्ञानकर्मसमुच्चयान्मोक्ष उच्यते। **मंजरीकारेण निराकृतमेतत्।**

न हि तत्साध्यो मोक्षः, स्वर्गादिवदनित्यत्वप्रसंगात्, अपि च आत्मैव स्वरूपावस्थितो मोक्ष इत्युच्यते। न चात्मस्वरूपं कर्मसाध्यम्, अनादिनिधनत्वेन सिद्धत्त्वात्।

एवं विविधविचारानुशीलनेन कतिपये पक्षाः विचारार्थं समुपस्थिताः

1. ज्ञानाधिगमात् सर्वेषां कर्मणां क्षयः
2. ज्ञानाधिगमात् संचितक्रियमाणयोरेव क्षयः, परं प्रारब्धस्य भोगेनैव क्षयः
3. मोक्षः ज्ञानसाध्यः
4. मोक्षः ज्ञानकर्मोभयसाध्यः
5. मोक्षावस्थायां सर्वात्मना कर्मणामात्यन्तिकनिवृत्तिः
6. मोक्षावस्थायां सर्वात्मना कर्मणां न दाहः

अत्रैतद् विचारणीयम्- जगतः कारणं किमस्ति यदि अज्ञानमेव जगतः कारणं मतं तदा ज्ञानाधिगमात् अज्ञाने नष्टे सति तज्जन्यस्य जगतः स्थितिः कथं स्यात्। एषा विप्रत्तिपत्तिः जायेत। एवमेव कर्मणामात्यन्तिक-निवृत्त्यभावे मोक्षस्य अनित्यत्वप्रसंगः जायेत।

शङ्कराचार्य- उमास्वातिप्रभृतय आचार्याः कर्मणा-मात्यन्तिकनिवृत्तिमेव स्वीकुर्वन्ति मोक्षावस्थायाम्। अष्टादशाधिकशतद्वयग्रन्थानां प्रणेतारः पं. मधुसूदनौझा महोदयः तेषां मतं निराकरोति-

स चैष रसे बलानां चितिसम्बन्धात् सिद्धो भावः **'पुरुष'** इत्युच्यते। यत्र तु बलानां चयनं नास्ति किन्तु सहचरभावेन सर्वाण्यपि बलानि रसे क्वचिदुत्थाय उत्थाय प्रतितिष्ठन्ति वितिष्ठन्ते वा स एव बलविशिष्टो रसः **'परात्पर'** इत्युच्यते। एष च सहचरभावेन बलानामन्यो-न्यसम्बन्धो मुक्तिकालेऽपि द्रष्टव्यः। यत्तु कृत्स्नकर्म-विप्रमोक्षो मोक्ष इति शंकराचार्योमास्वामिप्रभृतयो दार्शनिकाः प्रतिजानते तदेतदश्रद्धेयं मन्यामहे। आत्मनोऽव्ययस्य विद्याकर्मोभयरूपतया ज्ञानकर्मा-त्यन्तनिवृत्तेरवैज्ञानिकत्वात्। अथवा तेषां हृद्ग्रन्थि-बन्धनौपयिकचितिसम्बन्धापगमे एव तात्पर्यमस्तीत्य-ध्यवसेयम्। न हि रसोऽयम् अन्तरेण बलानि कदाचिदुपपद्यते। उभयोरप्यनयोः सदसतोर-मृतमृत्युसंज्ञयो रसबलयोः परस्परेणाविनाभूतत्त्वात्। (विज्ञानविद्युत्)

शंकराचार्येणापि मुण्डकोपनिषदः वचनप्रामाण्येन अध्यात्मोपनिषदः वचनं निराकृतम्-

**उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुञ्चति।**
**इति यच्छ्रूयते शास्त्रे तन्निराक्रियतेऽधुना।।**

(अपरोक्षानुभूति-90)

सत्यपि आत्मज्ञाने प्रारब्धस्य भोगेनैव नाशं स्वीकुर्वतां मुखमुद्रणाय आचार्येण नैके तर्काः प्रदत्ताः। आचार्यशंकरेण रचितानां विविधभाष्य-टीका-ग्रन्थानामध्ययनेन एतत् प्रतीयते यत् गीता-ब्रह्मसूत्रादिभाष्याणां रचनाकालः विवेकचूडामणि-अपरोक्षानुभूतिरचनाकालात् पूर्वतरोऽस्ति, गीतायाः 'ज्ञानाग्निः सर्वकर्माणि....' इत्यस्य श्लोकस्य भाष्यमत्र द्रष्टव्यम्-

'यथा एधांसि....' काष्ठानि समिद्धः सम्यग् इद्धो दीप्त अग्निः भस्मसात् कुरुते तथा निर्बीजीकरोति इत्यर्थः। न हि साक्षाद् एव ज्ञानाग्निः कर्माणि इन्धनवद् भस्मीकर्तुं शक्नोति, तस्मात् सम्यग्दर्शनं सर्वकर्मणां निर्बीजत्वे कारणम् इति अभिप्रायः। सामर्थ्याद् येन कर्मणा शरीरम् आरब्धं तत् प्रवृत्तफलत्वाद् उपयोगेन एव क्षीयते। अतो यानि अप्रवृत्तफलत्वाद् ज्ञानोत्पत्तेः प्राक् कृतानि ज्ञानसहभावीनि च अतीतानेकजन्मकृतानि च तानि एव सर्वाणि भस्मसात् कुरुते।

एवमेव ब्रह्मसूत्रेऽपि 'अनारब्धकार्ये एव तु पूर्वं तदवधेः' (ब्रह्मसूत्रे 4/1/15) सूत्रस्य भाष्यं द्रष्टव्यम्-

'पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्वि-नाशोऽवधारितः स किमविशेषेणारब्धकार्ययोरना-रब्धकार्ययोश्च भवत्युत विशेषेणानारब्धकार्ययोरेवेति विचार्यते। तत्र उभे उ हैवैष एते तरति (बृ. 4.4.22) इत्येवमादिश्रुतिषु अविशेषश्रवणादविशेषेणैव क्षय इति। एवं प्राप्ते प्रत्याह-अनारब्धकार्ये एव त्विति। अप्रवृत्तफले एव पूर्वे जन्मान्तरसंचिते, अस्मिन्नपि च जन्मनि प्राग्ज्ञानोत्पत्तेः संचिते, सुकतदुष्कृते ज्ञानाधिगमात् क्षीयेते, नत्वारब्धकार्ये साभिमुक्तफले याभ्यामेतद् ब्रह्म ज्ञानायतनं जन्म निर्मितम्, इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावाज्ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत.... तस्मादनारब्धकार्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय इति **निर्णयः**'।

परन्तु विवेकचूडामणि-अपरोक्षानुभूतिग्रन्थयोः तैः ज्ञानाधिगमात् प्रारब्धस्यापि क्षयस्तर्कैरुपस्थापितः।

1. अज्ञानं जगतः उपादानकारणं, यथा मृत्तिका मृद्भाण्डस्य। कारणक्षये सति कार्यस्य स्थितिः कथं भवेत्।

**उपादानं प्रपंचस्य मृद्भाण्डस्येव कथ्यते।**
**अज्ञानं चैव वेदान्तैस्तस्मिन्नष्टे क्व विश्वता।।**

(अपरोक्षा. 94)

2. यथा जाग्रदवस्थायां पुरुषस्य स्वप्नप्रपंचेन नास्ति कोऽपि सम्बन्धः तद्वत् ज्ञानोदयानन्तरं देहादीनामसत्य-त्वात् प्रारब्धः नैव विद्यते यथा स्वप्नो विबोधतः -

**तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते।**
**देहादीनामसत्यत्वाद्यथा स्वप्नो विबोधतः।।**

(अपरोक्ष, 9)

**उपाधितादात्म्यविहीनकेवलब्रह्मात्मनैवात्मनि**
**तिष्ठतो मुनेः।**
**प्रारब्धसद्भावकथा न युक्ता**
**स्वप्नार्थसम्बन्धकथेव जाग्रतः।।**

(विवेक 455)

3. तत्त्वज्ञाने सति अज्ञानजन्यदेहादिप्रपंचस्य शून्यत्वात् प्रारब्धः कथं स्यात्, यथा रज्जुज्ञाने सति सर्पस्य स्थितिः कथं भवेत्।

**कर्म जन्मान्तरीयं यत्प्रारब्धमिति कीर्तितम्।**
**तत्तु जन्मान्तराभावात् पुंसो नैवास्ति कर्हिचित्।।**

(अपरोक्षा. 92)

अत्रेयं शंका भवति यत् प्रारब्धक्षये सति कथं ज्ञानिनः देहस्थितिः दृश्यते। अस्मिन् विषये भगवता शंकरेण प्रतिपादितम्-

**ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि।**
**तिष्ठत्ययं कथं देह इति शंकावतो जडान्।**
**समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः।**
**न तु देहादिसत्यत्वबोधनाय विपश्चिताम्।**
**यतः श्रुतेरभिप्रायः परमार्थैकगोचरः।।**

(विवेकचूडा, 463-464)

**देहस्यापि प्रपंचत्वात् प्रारब्धावस्थितिः कुतः।**
**अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः।**

(अपरोक्ष. 97)

4. 'क्षीयन्ते चास्य कर्माणि' इत्यत्र बहुवचनप्रयोगोऽपि सर्वेषां कर्मणामेव क्षयं कथयति। स्वाभिप्रायेण द्विवचनप्रयोगः न कर्तव्यः विद्वद्भिः, श्रुतेः शब्दप्रधानत्वात्। यथा शंकरेणापि आचार्येण अनुमोदितमेतत्-

**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।**
**बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च तत्स्फुटम्।।**

ज्ञानावबोधादूर्ध्वं प्रारब्धस्य स्थितिस्वीकरणात् अद्वैतमतहानिः भवेत्, प्रारब्धरूपद्वैतस्थितेः मोक्षाभावः ज्ञानोच्छेदश्च जायेत-

**उच्यतेऽज्ञैर्बलाच्चैतत्तदानर्थद्वयागमः।**
**वेदान्तमतहानं च यतो ज्ञानमिति श्रुतिः।।**

(अपरो. 11)

अपरं च ज्ञानिनः जन्मान्तरस्याभावे सति जन्मान्तरकर्मणामप्यभावः, तदा प्रारब्धस्य स्थितिः कुतः स्यात्।

एवम् आचार्यशंकरेण कर्मणामत्यन्तनिवृत्तिः स्वीकृता। एषा एव मोक्षस्य स्थितिः।

तत्त्वार्थसूत्रेऽपि कर्मणामात्यन्तिकी निवृत्तिः प्रतिपादिता-

मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् (10/1 तत्त्वार्थसूत्रम्)

**बन्धहेत्वभावनिर्जराभ्याम् (10/2) इति,**
**कृत्स्नकर्मक्षयो मोक्षः। (10/3) इति च।**

पं. मधुसूदन ओझा महोदयस्याभिमतमत्र पूर्वमेव प्रतिपादितम्।

अस्मिन् विषये शंकैका जायते यत् कथं ज्ञानकर्मणोर्नित्यां स्थितिं प्रतिपादयन्नपि ओझामहोदयः अद्वैतमतमत्र स्थापयति, अस्याः निराकरणं तद्रचिते ब्रह्मसिद्धान्ते द्रष्टव्यम्-

**ब्रह्म श्रुतौ तद् रस इत्युदीरितं शक्तिर्बलमित्युदीर्यते।**
**बलं रसाद्भिन्नमिदं न गण्यते**
**न श्रौतमद्वैतमसौ विरुद्ध्यते।।**

(ब्रह्मसिद्धान्त-रसबलाधिकरणम्, 13)

**निष्कर्षः** - अत्र कतिपये प्रश्नाः साधनीयाः। मोक्षस्य किं स्वरूपमस्ति। मोक्षः ज्ञानसाध्यः, कर्मसाध्यः उत वा ज्ञानकर्मोभयसाध्यः।

**मोक्षस्य** - स्वरूपप्रतिपादकाः विचाराः द्रष्टव्याः

(1) **ज्ञानस्य ज्ञेयतापत्तिर्बन्ध इत्यभिधीयते**
**तस्यैव ज्ञेयताशान्तिर्मोक्ष इत्यभिधीयते-**

(योगवासिष्ठ द्वितीय खण्ड, 905/1)

मोक्षः ज्ञानसाध्यः -

**ईदृशोऽयं जगद्वृक्षो जायतेऽहन्त्वबीजतः।**
**बीजे ज्ञानाग्निविदग्धे नैव किंचन जायते।**

एवं योगवासिष्ठे मोक्षस्य ज्ञानसाध्यता।

(2) आचार्यशंकरानुसारेण जैनपरम्परायां च कर्मणामात्यन्तिकनिवृत्तिरेव मोक्षः, आचार्यशंकरेण ज्ञानसाध्यता मोक्षस्य प्रतिपादिता। उमास्वामिना ज्ञानकर्मोभयसाध्यता प्रतिपादिता।

(3) ब्रह्मसूत्रेऽपि मोक्षस्य ज्ञानकर्मोभयसाध्यतैव प्रतिपादिता। यद्यपि कर्मणामत्यन्तनिवृत्तिरेव मोक्षः स्वीकृतः तैराचार्यैः।

(4) पण्डित ओझामहोदयानुसारेण – 'बलानां चितिनाश एव मोक्षः' इति निरूपितः, स च ज्ञानसाध्य एव।

(5) आचार्यकुन्दकुन्देन – 'आत्मनः स्वरूपावस्थितिः मोक्षः' इति स्वीकृतं स च ज्ञानसाध्यः एव।

परमट्ठो खलु समओ सुद्धो जो केवली मुणी णाणी तम्हीं ट्ठिदा सहावे मुणिणे पावंति णिव्वाणं (3/151 समयसारः)

**परमार्थः खलु समयः शुद्धो यः केवली मुनिर्ज्ञानी।**
**तस्मिन् स्थिताः स्वभावे मुनयः प्राप्नुवन्ति निर्वाणम्।।**

परमार्थे त्वस्थितः यः करोति तपो व्रतं च धारयति। तत्सर्वं बालतपो बालव्रतं वदन्ति सर्वज्ञाः। (समयसार 3/152)

**व्यवहारेणोपदिश्यते ज्ञानिनश्चरित्रं दर्शनं ज्ञानम्।**
**नापि ज्ञानं च चारित्रं न दर्शनं ज्ञायकः शुद्धः।।**

एवं कुन्दकुन्दाचार्येण ज्ञानमेव मोक्षहेतुः स्वीकृतः। आत्मनः स्वरूपावस्थितिरेव मोक्षावस्था निरूपिता।

शिवगीतायामपि कर्मणामत्यन्तनिवृत्तिः प्रतिपादिता। अज्ञानग्रन्थिनाशः एव मोक्षः इति तन्मतम्।

**मोक्षस्य न हि वासोऽस्ति ग्रामान्तरमेव वा।**
**अज्ञानहृदयग्रन्थिनाशो मोक्ष इति स्मृतः।।**

(अष्टावक्रज्ञानामृते पृष्ठ सं. 27)

अष्टावक्रगीतायाम् बन्धमतिरेव बन्धकारणम् स्वीकृतम्–

**मुक्ताभिमानी मुक्तो हि बद्धो बद्धाभिमान्यपि।**
**किम्वदन्तीह सत्येयं या मतिः सा गतिर्भवेत्।।**

अष्टावक्रः अद्वैतप्रतिपादकोऽचार्य अस्ति। तन्मते आत्मा शुद्धः बुद्धधः मुक्तोऽस्ति–

**आत्मा साक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः।**
**असंगो निःस्पृहः शान्तो भ्रमात् संसारवानिव।।**

एवं स्वरूपेण नित्यशुद्धबुद्धचिद्रूपोऽसावात्मा भ्रमात् बद्धमनुभवति मुक्त्यर्थं समाधिं रचयति, एष एव तस्य बन्धः। यथा च 'मुक्तिः कथं भविष्यति' इति जनकेन पृष्टे सति अष्टावक्रः उत्तरयति–

अयमेव ते बन्धो यत्समाधिमनुतिष्ठति। एवं अष्टावक्रोऽपि मोक्षं ज्ञानसाध्यं मन्यते।

एतेषां मतानां सम्यक् परिशीलनेन ज्ञायते यत् आत्मनः स्वरूपावस्थितिः एव मोक्षः, स च ज्ञानसाध्यः। तत्त्वज्ञानादूर्ध्वं कर्मणां स्थितिः न स्वीकरणीया, यतः जगतः कारणमज्ञानमेव स्वीकृतं सकलदार्शनिकप्रस्थानेषु। तन्निवृत्तिः ज्ञानाद् भवति। ज्ञानाज्ञाने प्रकाशान्धकाराविव विरुद्धरूपे, अत एव ज्ञाने सति अज्ञानस्य कुतः स्थितिः, अज्ञानाभावे तज्जन्यपरिणामदेहादीनां भावः कथं भवेत्। सत्यपि तत्त्वज्ञाने यत् ज्ञानिनां देहदर्शनमस्ति तदपि अज्ञानिनां दृष्टौ एवास्ति। ज्ञानिनां कृते देहस्य स्थितिर्नास्ति। तदपि येषां मते प्रारब्धस्य भोगेनैव नाशोऽस्ति तेषां कृते अष्टावक्रस्य वचनमेव, समीचीनं प्रतीयते–

**किंवदन्तीह सत्येयं या मतिः सा गतिर्भवेत्।**

ओझामहोदयैः कर्मणामात्यन्तिकनिवृत्तिः न स्वीकृता।

एतादृश्यां स्थितौ पुनः बलानां चितिसम्बन्धेन मुक्तस्यापि बन्धस्थितेः प्रसंगः स्यात्, मोक्षस्य अनित्यत्वमपि। अज्ञानं जगत्कारणं इति स्वीकुर्वद्भिः तैराचार्यैः नष्टेऽप्यज्ञाने कर्मात्यन्तिकनिवृत्तिः कथं न स्वीकृता एतद् विचारणीयम्।

**संस्कृतविभागाध्यक्षचरः**
**जयनारायणव्यासविश्वविद्यालयः, जोधपुरम्**

# सप्त ऋषयः प्रतिहिताः शरीरे

❑ डॉ. रामनारायणशास्त्री

वैदिकवाङ्मये मानवशरीरं देवपुरी-**दैवी नौः**-**यज्ञिया तनूः**[1] इत्यादिभिरनेकाभिः संज्ञाभिरभ्यधीयत। भूरादीन सप्तलोकान् परिहाय केवलं भूमण्डल एव पश्येम तर्हि असंख्यातानि प्राणिशरीराणि दरीदृश्यन्ते। एतेषु शरीरेषु सत्स्वपि केवलं मानवशरीरमेव विशेषणानीमानि प्राप्नोति यतोहि मानवशरीरायैव ''सप्त ऋषयः प्रतिहिताः शरीरे'' प्रणिगदति साक्षाद् भगवान् वेदः[2]। ऋषयो देवा देवाश्च ऋषयः कथ्यन्ते। एतावता ऋषयो देवाश्च यत्र निवसन्ति सा देवपुरी निगद्यते। वैदिकवाङ्मयस्य गहनाध्ययननिदिध्यासनेनैव कृष्णद्वैपायनो व्यासो वेदव्यासोऽभिधीयते। तैः सत्यं तथ्यमिदं साक्षात्कृत्यैव उद्घोषणेयमुद्घोषिता- **''नहि मानुषाच्छ्रेष्ठतरं हि किञ्चित्''**[3]।

शरीरे प्रतिहिताः सप्त ऋषयः के? कथञ्च ते ऋषयः इति विचारणात् पूर्वं किन्नाम शरीरमिति विमृशामः। शरीरम्-हिंसार्थवतः शृ (शृ हिंसायाम्) धातोरौणादिकेन ईरन्प्रत्ययेन सिद्ध्यति शरीरशब्दः[4]। ईरन् प्रत्ययस्य नित्वादाद्युदात्तोऽयं शरीरशब्दः[5]। अत्राधिकरणे कारके सप्तम्येकवचने ''शरीरे'' इति पदं वर्तते। निरुक्तकारो **महर्षियास्कः** शरीरशब्दमेवं निर्वक्ति-शरीरं शृणातेः शम्नातेर्वा[6]। शब्दनिर्माण-प्रक्रियां निर्वचनं वा एनमधिकृत्य शक्यतेऽभिधातुं यद् यत्पापानि नाशयति पूर्वकृतानि पुण्यापुण्यानि कर्माणि भुक्त्वा क्षपयति क्षिणोति वा तच्छरीरम्। शृणाति हिनस्ति पापानि पूर्वकृतानि पुण्यापुण्यानि भोगेन शमयति यत्तच्छरीरम्। समीहेन्द्रियाणां इन्द्रियार्थानां प्राप्तिसाधन-माश्रयं वा यत् तच्छरीरमिति न्यायदर्शनम्। यथा च सूत्रम्- **चेष्टेन्द्रियार्थाश्रयः शरीरम्**[7]। शतपथब्राह्मणस्य वचनं वर्तते यद् बाह्यकरणानामन्तः करणानां प्राणानाञ्च य आश्रयस्तच्छरीरम्-यत् सर्वमस्मिन्नाश्रयन्त तस्मादु शरीरम्[8]। महर्षिमहीदास **ऐतरेयः** शरीरं परिभाषयन् निगदति रेतो वपा वा नैव शरीरं किन्तर्हि लोहितं मांसमेव शरीरम्- अशरीरं वै रेतोऽशरीरं वपा यद् वै लोहितं यन् मांसं तच्छरीरम्[9]। जीवात्मा येन सुखदुःखे अनुभवति तच्छशरीरमिति शाङ्खायनारण्यं वचः। केन सुखदुःखे इति शरीरेण[10]। महाकवेः कालिदासस्य भणितिर्वर्तते यत् पुरुषार्थचतुष्टयस्य मूलस्य धर्मस्य प्रथमं साधनं शरीरमेव- **''शरीरमाद्यं खलु धर्मसाधनम्**[11]। ईदृशं शरीरं यत्सर्वाश्रयः पुरुषार्थचतुष्टयस्य प्रथमं साधनं यस्माच्च प्रशस्यतरं किमपि नास्ति तदा तु सत्यमेव यदृषयो देवा वा एनमाश्रित्य प्रतिष्ठास्यन्त्येव। एतावतैव कथयति यजुर्वेदः-सप्त ऋषयः प्रतिहिताः शरीरे।

ऋषयः गत्यर्थकाद् ऋष् (ऋषी गतौ) धातोरौणादिके इनि प्रत्यये कृते सति सिद्ध्यति **ऋषिशब्दः**।[12] तेनैव सूत्रेण इन्प्रत्ययस्य किद्विधानाद् गुणनिषेधो भवति[13]। प्रत्ययस्य नित्वाद् ऋषिशब्द आद्युदात्तो वर्तते। ऋषति गच्छति प्राप्नोति जानाति वा स ऋषिः, मन्त्रार्थद्रष्टा वा। वैदिकवाङ्मये ब्राह्मणग्रन्थेषु निरुक्ते च ऋषिशब्दस्य निर्वचनानि प्राप्यन्ते तत्र प्रथमन्तावत् शतपथब्राह्मणस्य निर्वचनम्। शतपथस्य ऋषिर्याज्ञवल्क्यः कथयति पुरस्ताद् ये ब्रह्मणो ब्रह्माण्डाद् वा श्रमतपोभ्यां गतिं ज्ञानं वा इच्छन्त अप्राप्नुवन् ते

ऋषयोऽभवन्। ते यत् पुरास्मात् सर्वस्मादिदमिच्छन्तः श्रमेण तपसारिषंस्तस्माद् ऋषयः[14]। **तैत्तिरीयारण्यक**-मृषिशब्दं व्युत्पादयन् ऋषीणामृषित्वमपि बोधयति। तस्यास्ति निर्वचनं यद् अस्य सर्वस्य ज्ञानाय तपस्यमानेभ्य ब्रह्म स्वयमेवाधिगतस्ते ऋषयस्तदेव तेषामृषित्वं यत् तपसि साफल्यं प्राप्यते। अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत् तदृषयोऽभवन् तदृषीणामृषि-त्वम्[15]। सामवेदीये जैमिनीये ब्राह्मणे लिखितं ये श्रमतपोव्रतचर्याभिर्नाकमधिगतास्ते ऋषयः। ऋषयो ह वै स्वर्गं लोकं जिग्युः श्रमेण तपसा व्रतचर्येण[16]। मातृनाम्ना सुख्यात ऋषिर्महीदास ऐतरेयः प्रणिगदति ये अस्माकं पूर्वजाः सर्वमिदं ज्ञातवन्तः पूर्वं प्रेताः साफल्यमधिगतास्ते निश्चयेन कवय आसन्। ये वै ते न ऋषयः पूर्वं प्रेतास्ते कवयः[17]। ऐतरेयस्य वचनमिदं पोषयन् शतपथब्राह्मणं ऋषीन् विप्रान् कवींश्च ब्रवीति एते वै विप्रा यदृषयः[18]। एते वै **कवयो** यदृषयः[19]। यः सदसदो वेत्ता हेयोपादेयस्य च ज्ञाता वर्तते स एव ऋषिः क्रान्तदर्शी च निगद्यते तत्त्वदर्शिभिरिति तथ्यमेनं स्पष्टयन् भणति महर्षियाज्ञ-वल्क्यो यो ज्ञानकर्मणोः प्रतिबोधं प्राप्तवान् स महान् ऋषिरार्षेयश्च विद्यते-यो ज्ञातो अनूचानः स ऋषिरार्षेयः[20]। वचोभिरेभिः सुस्पष्टमिदं यद्यो ज्ञानाय यत्नवान् भवत्यधिगमे सक्षमः, ज्ञात्वा ज्ञातं तथ्यं जीवनचर्यायां व्यवहर्तुं तत्परः समर्थश्च भवत्यथ च हेयोपादेयस्य ज्ञानं यस्य धर्मः स ऋषिर्भवति। निरुक्तकारोऽप्येवमेव लिलेख-**ऋषिर्दर्शनात्**[21]। अधिगमनमवबोधनं नाम दर्शनमिति ख्यातमेव।

ईदृशो ज्ञानधर्मवन्तो द्वित्रा नैव सप्त ऋषय अस्मान् बोधनाय स्वर्गप्रापणाय अस्माकं शरीरे प्रतिष्ठिताः सन्ति। के ते ऋषयः? इति वयं सम्प्रति विचारयामः। के ते ऋषयः? इति प्रश्ने प्राप्ते यजुर्वेदं व्याकुर्वाणाः व्याख्यायमानाः स्वामिनो महर्षिदयानन्दसरस्वती-महाभागाः **''सप्त ऋषयः प्रतिहिताः शरीरे''** इति मन्त्रांशमित्थं स्पष्टयन्ति- (सप्त) पञ्चज्ञानेन्द्रियाणि मनोबुद्धिश्च (ऋषयः) विषयप्रापकाः (प्रतिहिताः) प्रतीत्या धृताः सन्ति शरीरे[22]। निश्चयेन इन्द्रियाणि ऋषयः। कथम्? यतो हीमानि स्वस्वविषयमवगम्य मनोबुद्धिभ्या-मात्मानं प्रयच्छन्ति। इन्द्रियाणि वै ऋषयस्तानीमानि विषयाण्यधिगम्य मनोबुद्धिभ्यामात्मानं प्रापयन्ति तस्मादिन्द्रियाणि ऋषयः। **''तस्याऽऽसत ऋषयः सप्त-तीरे वागष्टमी ब्रह्मणा संविदाना''** इति व्याचक्षाणा लिखन्ति महर्षियाज्ञवल्क्यमहोदयाः-तस्यासत ऋषयः सप्ततीर इति प्राणा वा ऋषयः प्राणानेतदाह। वागष्टमी ब्रह्मणा संविदानेति ब्रह्मणा संवित्ते। अत्र प्राणशब्देन इन्द्रियाणि कथ्यन्ते। वागष्टमी इत्यत्र ज्ञानेन्द्रियं रसना जिह्वा, कर्मेन्द्रियत्वेन वागष्टमी कथिता सा ब्रह्मणा ज्ञानेन सम्यग् ज्ञापयतीति। द्वौ कर्णौ गोतमभरद्वाजौ ऋषी, द्वे अक्षिणी विश्वामित्रजमदग्नी ऋषी, द्वे नासिके वसिष्ठकश्यपौ ऋषी इति षट्। अत्र सर्वत्र इन्द्रियगणने अत्रिऋषि, इतीमे सप्त ऋषयः। यथा चाह शतपथब्राह्मणम्- **''इमावेव गोतमभरद्वाजावयमेव गोतमोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद् यदत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद**[23]। वागत्ता इत्यत्र अस्माकं निवेदनं यद् इन्द्रियगणनाप्रक्रियायां एका वागेव ज्ञानेन्द्रियत्वेन

कर्मेन्द्रियत्वेन गण्यते। यदा सा रसं वेत्ति तदा सा रसना **ज्ञानेन्द्रियम्**। यदा च वदति ज्ञानं-ज्ञातं तत्त्वं वदति, वदन्ती ज्ञानं वितरति तदा सा **कर्मेन्द्रियम्।** तथ्यमेनं प्रकटयति सामवेदीयं जैमिनीयं ब्राह्मणम्- द्वयं वाचा करोति अन्नञ्चैनयात्ति वदति च[24]।

यजुर्वेदस्य व्याख्यानं शतपथब्राह्मणं त्रयोदशाध्या-यस्यान्तिमान् पञ्चमन्त्रान् व्याचक्षाणः प्राणस्य मनसः चक्षुषः श्रोत्रस्य वाचश्च सकारणमृषित्वमुल्लिखति। प्राणो निश्चयेन वसिष्ठ ऋषिर्वर्तते यतोहि स सर्वेषां श्रेष्ठः सर्वञ्चावृत्य वसति। वसिष्ठ ऋषिरिति। प्राणो वै वसिष्ठऋषिर्यद् वै नु श्रेष्ठस्तेन वसिष्ठोऽथो यद् वस्तृतमो वसति तेनो एव वसिष्ठः[25]। प्राणाः सर्वेभ्यो निवासमावरणञ्च प्रयच्छन्ति तस्मात् प्राणान् वसून् निगदति जैमिनीयमुपनिषद् ब्राह्मणम्- प्राणा वै वसवः। प्राणा हीदं सर्वं वस्वाददते[26]। सम्राजो दिलीपस्य कुलगुरुमैतिहासिकं वशिष्ठमृषिं वयं जानीम एव। सोऽपि स्वीयं प्राणं मन इन्द्रियाणि च वशीकृत्य, जित्वा वसति तस्माद् वशिष्ठः। यथा चाह महाकविकालिदासः **प्रस्थापयामास वशी वशिष्ठः**[27]। वैदिकसाहित्यं प्राणान् ऋषीन् अनेकत्र कथयति। यथा-प्राणा ऋषयः[28]। प्राणा उ वा ऋषयः[29]। प्राणा वा ऋषयः[30]। शतपथब्राह्मणं प्राणान् देवानपि कथयति प्राणा वै विश्वेदेवाः[31]।

मनो निश्चयेन भरद्वाज ऋषिर्विद्यते। वाजस्यार्थोऽन्नं तन्मनो धरते पोषयतीति मनश्चान्नं भरति गृह्णाति, एतावता मनो भरद्वाज ऋषिः। भरद्वाज ऋषिरिति। मनो वै भरद्वाज ऋषिरन्नं वाजो यो वै मनो बिभर्ति सोऽन्नं वाजं भरति तस्मान्मनो भरद्वाज ऋषिः[32]। विश्वं जगच्चक्षुषा पश्यति, अथ च चक्षुः सर्वं पश्यत्यतश्चक्षुर्जमदग्निः ऋषिः। जमदग्नि ऋषिरिति। चक्षुर्वै जमदग्नि ऋषिर्यदनेन जगत् पश्यत्यथो मनुते तस्माच्चक्षुर्जमदग्नि ऋषिः[33]। श्रोत्रं विश्वेषां विश्वानि च शृणोति सत्यमसत्यं वा यत्किमपि शोभनीयमशोभनीयमश्रवणीयं तदपि शृणोति, विश्वतश्च शृणोति। विश्वं सर्वा आशा अस्य श्रोत्रस्य मित्रं भवति, अतएव श्रोत्रं विश्वामित्र ऋषिः। विश्वामित्र ऋषिरिति। श्रोत्रं वै विश्वामित्र ऋषिर्यदनेन सर्वतः शृणोत्यथो यदस्मै सर्वतो मित्रं भवति तस्माच्छ्रोत्रं विश्वामित्र ऋषिः[34]। वाग् नु विश्वकर्मा ऋषिः कथम्? यतो हि विश्वे जगति यत्किमपि क्रियते, विश्वं जगद् यत्किमपि करोति तत्सर्वं वागादेशेनैव क्रियतेऽतो वाग् विश्वकर्मा ऋषिः। विश्वकर्मा ऋषिरिति। वाग्वै विश्वकर्मा ऋषिर्वाचा हीदं सर्वं कृतं तस्माद् वाग् विश्वकर्मा ऋषिः[35]। इत्थमेव नासिका गन्धधारणाद् गन्धर्व ऋषिः। सर्वाणीन्द्रियाणि त्वचा निर्मितेषु गोलकेषु त्वचि वा वसन्त्याहोस्वित् सर्वेषु इन्द्रियेषु त्वगभिव्याप्ता, एतेन त्वग् गौतम ऋषिर्वर्तते।

एकत्र वैदिकवाङ्मये मनो भरद्वाज ऋषिः कथ्यतेऽ-परत्र च वेदे समग्रस्य ज्ञानविज्ञानस्य राशेर्वेदस्याधि-ष्ठानमभिधीयते-यस्मिन्नृचः सामयजूँषि यस्मिन् प्रतिष्ठिता रथनाभाविवारा[36]। एतावतैव मनो ब्रह्मर्षिः ब्रह्म ब्रह्माऽपि निगद्यते। मनो ब्रह्म[37]। मन एव ब्रह्म[38]। मनो ब्रह्मा[39]।

निरुक्तकारो महर्षिर्यास्को वाक्यमेनं अधिदैवतेना-ध्यात्मेन चेति द्विधा स्पष्टयति-सप्त ऋषयः प्रतिहिताः शरीरे, रश्मय आदित्ये। इत्यधिदैवतम्। अथाध्यात्मम्-सप्त ऋषयः प्रतिहिताः शरीरे। षडिन्द्रियाणि विद्या सप्तम्यात्मनि[40]। षडिन्द्रियाणि इत्यत्रास्माकं निवेदनं यत् पञ्चज्ञानेन्द्रियाणि षष्ठं मनः। यथा च साक्षाद् भगवान् वेदः-इमानि यानि पञ्चेन्द्रियाणि मनः षष्ठानि मे हृदि[41]।

सप्तमी विद्या बुद्धिरिति गण्यते। साङ्ख्यदर्शनं साङ्ख्यकारिका च प्रज्ञाम् अध्यवसायं निगदत:- अध्यवसायो बुद्धि:, तत्कार्यं धर्मादि:[42]। अध्यवसायो बुद्धिर्धर्मो ज्ञानं वैराग्यमैश्वर्यम्[43], यद् विषयं तत्त्वज्ञानं वा इन्द्रियाणि मनोबुद्धिभ्यामात्मानं प्रापयन्ति। एतेनैव कारणेन तानीन्द्रियाणि ऋषय: कथ्यन्ते। तत् तत्त्वज्ञानं हेयमुपादेयं वेति सत्यं तथ्यं वा बुद्धिर्निश्चिनोति सोऽपि ऋषि:। बोध ऋषिरिति। बुद्धिर्वै बोधऋषिर्यदनया बोध्यन्तेऽथ हेयोपादेयतया तत्त्वमध्यवसीयते तस्माद् बुद्धिर्बोधऋषि:।

इत्थमनेन विचारविमर्शेन सुस्पष्टं यत् पञ्चज्ञानेन्द्रियाणि मनो बुद्धिश्चेति, आहोस्वित् प्राणो मनश्चेति सप्त ऋषय: शरीरे प्रतिष्ठिता: सन्तीति।

### सन्दर्भा:

1. अथर्ववेद: 10/2/31//ऋग्वेद: 10/63/10//यजुर्वेद: 21/6//अथर्ववेद: 7/6/3//यजुर्वेद: 4/13//
2. यजुर्वेद: 34/55 3. महाभारतम्
4. धातुपाठ: 9/17//उणादिसूत्रपाठ: 4.30
5. अष्टाध्यायी सूत्रपाठ: 6/1/192
6. निरुक्तम् 2.5.2, 3.1, 5
7. न्यायदर्शनम् 1.1.11 8. मा.श.ब्रा. 6.1.1.4
9. ऐ.ब्रा. 2.2.4
10. शां.आ. 3.6 कौ. उप. 1.7
11. कुमारसम्भवम् 5.33
12. धातुपाठ: 6.7 उणादिसूत्रपाठ: 4.121
13. अष्टध्यायीसूत्रपाठ: 1.1, 5
14. मा.श.ब्रा. 6.1.1.1
15. तैत्तिरीयारण्यकम् 2.9.1
16. जै.ब्रा. 2.210 17. ऐ. ब्रा. 6.5.4
18. मा.श.ब्रा. 1.4.2.7
19. मा.श.ब्रा. 1.4.2.8
20. मा.श.ब्रा. 4.3.4.19
21. निरुक्तम् 2.2.2
22. यजुर्वेद: 34.55.दयानन्दभाष्यम्।।
23. मा.श.ब्रा. 14.5.2.5. व 6 का.श.ब्रा. 17.2.2.4 बृह.उप. 2.2.4
24. जै. ब्रा. 2.254 25.मा.श.ब्रा. 8.1.1.6
26. जै.उप.ब्रा.4.2.1.3 तुलनीयम् तै.ब्रा. 3.2.3.5
27. रघुवंशमहाकाव्यम् 2.70
28. मा.श.ब्रा. 7.2.3.5
29. मा.श.ब्रा. 8.4.1.5
30. मा.श.ब्रा. 6.1.1.1
31. मा.श.ब्रा. 14.2.2.37
32. मा.श.ब्रा. 8.1.1.6
33. मा.श.ब्रा. 8.1.2.3
34. मा. श. ब्रा. 8.1.2.6
35. मा.श.ब्रा. 8.1.2.9
36. यजुर्वेद: 33.5 37. गो. ब्रा. 1.2.10
38. गो.ब्रा. 2.5.4 को. ब्रा. 17.7
39. गो.ब्रा. 1.2.10. व 11
40. निरुक्तम् 14.4.2
41. अथर्ववेद: 19.9.5
42. साङ्ख्यदर्शनम् 2.1.13. व 14
43. साङ्ख्यकारिका 23

**सह-आचार्य:**
**राजकीयस्नातकोत्तरमहाविद्यालय:,**
**सिरोही-307001 ( राजस्थानम् )**
**दूरभाषाङ्क: 9413610928**

# कालिदाससाहित्ये खगोलविज्ञानम्

❑ जया शर्मा

संस्कृतजगति महाकविपदत्वेनाभिभूषितः, नैकेषां शास्त्राणां वेत्ता, यस्य कविताकामिनी अनायासेनैव सहृदयानां मनस्सु स्नेहसञ्चारिका, यस्योपमासाम्राज्यं सुसमृद्धं सुनियोजितं सुदीर्घञ्च। सः संस्कृतसाहित्य-चूडामणिः कालिदासः, यस्य लालित्यपूर्णा शैली काव्य-रसिकानां मनस्सु आनन्दाभिवर्धिका विज्ञानदायिनी च। तस्मात् कनिष्ठिकाधिष्ठितकालिदासात् पूर्वमनेके विद्वांसः आकाशमण्डलस्थतारागणसूर्येन्दुग्रहाणां स्थितिगति-विषये अनेकेषां सिद्धान्तानां प्रणयनं चक्रुः। लोकव्यवहारे के च सिद्धान्ताः तस्मिन् समये प्रचलिताः आसन् तेषां सर्वेषां दर्शनं कालिदासीयसाहित्यस्या-वलोकनेन कर्तुं शक्यते। कालिदासः न केवलं साहित्यस्य अपितु न्यायदर्शनमीमांसाज्योतिषादिविषयाणां प्रकाण्ड-पण्डित आसीत्। ज्योतिश्शास्त्रे **'ज्योतिर्विदाभरणम्'** नामधेय एकः ग्रन्थः यस्य कर्ताऽपि कालिदासः परन्तु सः तदेव महाकविकालिदासः अन्यो वा इत्यस्योपरि-विभिन्नमतानुशीला इतिहासकाराः।

अलमस्माकं विषयः कालिदाससाहित्ये प्रतिपादितं खगोलविज्ञानम् यस्यो-ल्लेखः कालिदासीयसाहित्ये क्वचिदुपमारूपेण क्वचिद् प्रसङ्गरूपेण क्वचित् विषयप्रतिपादनाय क्वचिच्चाव-गूढस्य प्रकाशाय प्राप्यते। कालिदासस्य अभिव्यक्तौ यावच्छब्दसौष्ठवं सरसव्यञ्जनाकौशलमस्ति तावदेव ज्ञानविज्ञानस्य शुद्धप्रामाणिकताऽपि अस्ति। अलंकृत-भाषायां निगडितगूढव्याकरणाच्छादितेषु वाक्येषु निबद्धं संस्कृतवाङ्मयस्य विज्ञानम्, यस्यान्वेषणे शोधार्थिनः अन्वेषकाश्च नितरां संलग्नाः, तस्यामेव परम्परायां कालिदासीये साहित्ये आवृतं ज्ञानपटमुत्पाटनाय मम मनसि अपि एषा जिज्ञासा गृहं चकार यदहमपि कालिदाससाहित्ये विस्तीर्णं तद्रहस्यं सङ्कलनरूपेण शोधसमुत्सुकान् प्रति प्रतिपादयामीति। यस्यां नव-वैज्ञानिक्यां समागतानां रसायन-भौतिक-चिकित्सा-प्राणि-मनोविज्ञान-भवननिर्माणम् एवं वास्तुकला-कृषि-ऋतु-पर्यावरण-वनस्पति-सौन्दर्य-ध्वनि-रक्षा-युद्धादिविषयाणां प्रासङ्गिकोल्लेखः कालिदासस्य सप्तकृतिषु संस्थितैः दृष्टान्तैः सह कृतः, येन स्पष्टीभवति यत् आधुनिकविकासस्य पृष्ठे यदाधारः तत् खलु संस्कृतवाङ्मयम् एव येन नितरां संवर्धितं पुष्पितञ्चाधुनिकविज्ञानम्।

कालिदाससाहित्ये वर्तमानविज्ञानस्य विविधशाखा-प्रशाखानाम् उद्धरणानि प्राप्यन्ते। क्वचिद्रसायन-सिद्धान्तानामुद्घाटनं, क्वचिद्भौतिकशास्त्रीया बोधगम्यता, क्वचिद् जीवनविज्ञानम् (प्राणिविज्ञानम्, वनस्पति विज्ञानम्) पर्यावरणं, क्वचिदृतुविज्ञानं, क्वचिच्चिकित्सा-विज्ञानम् मनोविज्ञानं तथा मिश्रितविज्ञानमस्ति यस्मिन् भवननिर्माणमभियान्त्रिकी, खगोलीयाध्ययनम्, सैन्य-युद्धविज्ञानविषये सदृष्टान्तविवरणं समुपलभ्यते।

सर्वमेतत् कवेः काव्यनिपुणतायाः संसूचकं शब्दकोशकलादीनां पुरुषार्थचतुष्टयसाधकग्रन्थानां पुराणेतिहासादीनां ज्ञानगौरवस्य महाकवौ अन्तर्भावमिति प्रकटयति। सर्वेषामेकस्मिन् शोधलेखे आलेखनं दुष्करमतः चमत्कृतिशीलं खगोलविज्ञानस्य उद्धरणानि संक्षिप्तोल्लेखेन मया प्रस्तूयन्ते। ते च सन्त्येवम्-

**'नक्रादिराशिषट्केषु यावत्तिष्ठति भास्करः।**
**तावत्सौम्यायनं प्रोक्तं याम्यायनं ततः परम्।।'**[1]

इत्यनेन सूर्यस्य उत्तरायणदक्षिणायनचलनक्रमः, यस्य प्रतिपादनं कालिदासस्य रघुवंशे-

**प्रययावातिथेयेषु वसन् ऋषिकुलेषु सः।**
**दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः।।**[2]

अर्थात् वर्षाकालिकेषु वार्षिकेषु नक्षत्रेषु वसन् भास्करो तथा दक्षिणदिशं जगाम तथैव रामः दक्षिणं ययौ। अन्यः-

**सः पितुः पितृमान्वंशं मातुश्चानुपमद्युतिः।**
**अपुनात्सवितेवोभौ मार्गावुत्तरदक्षिणौ।।**[3]

अर्थात् सविता उत्तरदक्षिणावुभौ मार्गौ यथा पुनाति तथैव कुशकुमुदवत्योः सुतः अतिथिः पित्रोः वंशमपुनात्।

ज्योतिःशास्त्रानुसारेण सूर्यं विहाय चन्द्रः यदा द्वादशान्तरे तिष्ठति तदा प्रतिपदा तथा द्वितीयातः पूर्णिमायां यावत् चन्द्रस्य वर्धनं भवति तदनन्तरं शनैः शनैः चन्द्रकलायाः ह्रासो भवति। अस्योल्लेखः रघुवंशेऽपि वर्तते।

**पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव**
**बालचन्द्रमाः।**[4]

नन्दिन्याः ललाटस्थरोमाङ्कस्योपमा द्वितीयायाः चन्द्रेण कृता यस्य स्वरूपं नवपल्लवसदृशं चिक्कणं श्वेतरक्तं वक्रञ्चास्ति।

**ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला।**
**बिभ्रती श्वेतरोमाङ्कं संध्येव शशिनं नवम्।।**[5]

तथा द्वितीयातः पूर्णिमापर्यन्तं चन्द्रस्य सम्पूर्ण-कलानां संकेत अर्धेन्दुत्वमप्राप्येव अतिथेः कुमारत्वादधिराज्यमवाप इत्यस्मिन् पदे संवृतः।

**बभौ भूयः कुमारत्वादाधिराज्यमवाप्य सः।**
**रेखाभावादुपारूढः सामग्र्यमिव चन्द्रमाः।।**[6]

सिद्धान्तग्रन्थेषु

**'भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा।**
**शशाङ्कपाते ग्रहणं कियद्भागादिकोनके'।।**

इत्यनेन चन्द्रग्रहणसम्भावना सदा पूर्णिमायां शराभावे एव स्वीकृता यस्योल्लेखः कालिदासेनापि कृतः।

**अपर्वणि ग्रहकलुषेन्दुमण्डला विभावरी**
**कथय कथं भविष्यति।**[7]

अन्तरिक्षमार्गाणां विभाजनक्रमं मातलिदुष्यन्त-संवादेन कालिदासः बहुसाधुतया कल्पयति। यस्मिन् राजा दुष्यन्तः मातलिं पृच्छति-मातले! असुर-संप्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता मया न लक्षितः स्वर्गमार्गः। कतमस्मिन् मरुतां पथि वर्तामहे? तदा मातलिः तं प्रत्युत्तरति-

**त्रिस्रोतसं वहति यो गगनप्रतिष्ठां**
**ज्योतींषि वर्तयति च प्रविभक्तरश्मि :।**
**तस्य द्वितीयहरिविक्रमनिस्तमस्कं**
**वायोरिमं परिवहस्य वदन्ति मार्गम्।।**[8]

इत्यनेन परिवहवायुमण्डलस्य वर्णनं कृत्वा कालिदासः अन्तरिक्षमार्गात् पृथिवीं यावत् मार्गस्य वर्णनं करोति यस्योल्लेखः सिद्धान्तग्रन्थेष्वपि प्राप्यते।

**भूवायुरावह इह प्रवहस्तदूर्ध्वः**
**स्यादुद्वहस्तदनु संवहसंज्ञकश्च।**
**अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्मात्**
**बाह्यः परावह इमे पवनाः प्रसिद्धाः।।**[9]

1. पञ्चाङ्गविज्ञानम् 2. रघुवंशम्, 12/25
3. रघुवंशम्, 17/2 4. रघुवंशे 3/22
5. रघुवंशे 1/83
6. रघुवंशे 17/30 7. कुमारसंभवम् 4/16
8. अभि. शाकु. 7/6
9. सिद्धान्तशिरोमणि गोलाध्याये मध्यमगतिवासना, श्लो.सं. 1

आवहः, प्रवहः, उद्वहः, संवहः, सुवहः, परिवहः, परावहः इमे सप्तपवनस्कन्धाः आकाशे विराजन्ते। एषु आवहे भूवायुः प्राणवायुः तिष्ठति, अत्रैव च भवति मेघानां निर्माणम्। आधुनिका एनं क्षोभमण्डलं कथयन्ति। आधुनिके खगोलविज्ञानेऽपि सप्तमण्डलानि सन्ति। येषां नामानि-क्षोभ, समताप, ओजोन, आयन, मध्यम, ताप, बाह्यमण्डलानि सन्ति। येन कालिदासस्य विस्तृत-ज्ञानस्यावबोधो भवति।

ध्रुवमर्थात्स्थिरम्। खगोलस्य यो बिन्दुरचलः तथा गगनमण्डलस्थ ग्रहनक्षत्रादीनां स्थितेः परिचायकः सः ध्रुवस्थानात् नवत्यंशान्तरे नाडीवृत्तं नाडीक्रान्तिवृत्तैक्यात् स्थिरा द्वादशराशयः सम्पूर्णगगनमण्डलस्थावयवैः सह ध्रुवं परिभ्रमन्ति। अस्य परिकल्पना कालिदासेन एवं प्रस्तुता-

**तं प्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः।**
**शरत्प्रसन्नैर्ज्योतिर्भिर्विभावर्य इव ध्रुवम्।।**[10]

शरदि प्रविशदाः निर्मला ज्योतिभिस्समुपेता रात्रयः येन प्रकारेण ध्रुवमनुचरन्ति तथैव पौरयोषितः प्रीति-विशदलोचनैः अतिथिमन्वयु इत्याशयः।

पूर्णिमाया अमायाश्च प्राकृतिकावस्थाविषयकं सिद्धान्तमतम्-

**तुल्यौ राश्यादिभिः स्यातामवस्यान्तकालिकौ।**
**सूर्येन्दू पौर्णमास्यान्ते भार्धे भागादिभिः समौ।**[11]

सूर्यप्रकाशेन शून्यमर्काद्विनिःश्रितः चन्द्रः पुनः तरणि किरणसङ्गात् दिनकरदिशि चकास्ति तथा ऋज्वन्तरे सम्मुखागमनात् पूर्णतामेति। मतस्यास्य पोषणं कालिदासेनापि कृतम्।

10. रघुवंशे 17/35

11. सूर्यसिद्धान्ते 4/7

सूर्यचन्द्रौ उभौ एव महोदधे उपचयापचयस्य कारणे स्तः। तयोर्मध्ये चन्द्रस्य प्रभावोऽधिको, भूमेः सन्निकर्षात्। पूर्णिमायाः समागते उपचयस्य प्रवेगः अर्थात् 'ज्वारः', अमावस्यायां अपचयस्य अर्थात् 'भाटा' इति शास्त्रमतम् अस्याप्युल्लेखः कालिदासेन कृतः-

**महोदधेः पूर इवेन्दुदर्शनाद् गुरुः**
**प्रहर्षः प्रबभूव नात्मनि।**[12]

कालिदासेन दिशादीनामुल्लेखोऽपि बहुधा कृतः तथा चैत्रवैशाखादिमासेषु सूर्यस्य गतिः तथा तेन उत्तरायणम्, वर्षमासादीनां ज्ञानम् कथं क्रियते इत्यादीनां वर्णनमपि कालिदासेन कृतम्। भौमग्रहस्य गतिविषयकं ज्ञानमपि कालिदासेन प्रकटितं, चन्द्ररोहिणीसंगविषयेऽपि संकेतः प्रदत्तः तथा 'रघोः जन्मसमये पञ्चग्रहाणां स्वकीयोच्चराश्यां संस्थितिरासीद्' इत्यनेन राजयोगस्य यदनुपममुदाहरणं कालिदासेन कथितं तन्निश्चयमेव पाण्डित्यपूर्णम्-

**ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः**
**सूचितभाग्यसम्पदम्।**
**असूत पुत्रं समये शचीसमा त्रिसाधना**
**शक्तिरिवार्थमक्षयम्।।**[13]

एतादृशी आधारशिला संस्कृतसाहित्यस्य या आधुनिकेभ्यः सदा प्रेरणादायिनी, भारतीयानां विशदचिन्तनस्य प्रद्योतिका, या समृद्धस्य भारतीय-विज्ञानस्य स्वरूपं प्रस्तौति। संस्कृतवाङ्मयेन विश्वस्य कृते कीदृशस्य ज्ञानराशेः प्रत्यर्पणं कृतम्, अस्य संक्षिप्तरूपं सोदाहरणेन शास्त्रीयचिन्तनेन च सहितं मया प्रस्तुतम्।

**शोधच्छात्रा, संस्कृतविभागः,**
**राजस्थानविश्वविद्यालयः, जयपुरम्**

12. रघुवंशे 3/17 13. रघुवंशे 3/13

पद्यपुष्पाणि-

# संस्कृता श्रेष्ठभाषा

❑ म.म. डॉ. कैलाशनाथद्विवेदी

सुकविमुनिजनैर्या, वेदभाषा प्रयुक्ता,
अभिनवनिधिरूपा, ज्ञान-विज्ञानराशेः।
अविदितमिह तत्त्वं, ब्रह्मणः किं जगत्यां,
सकलबुधजनैः सा, सेवनीया सुभाषा।।

रघुकुलकलकीर्तिं, कीर्त्तयन् संस्कृते यः,
लव-कुशसदृशं वै, शिक्षयन् शिष्यवृन्दम्।
विमलनृपचरित्रं, चित्रितं रामकाव्ये,
जयतु जगति चाद्यः, काव्यकर्त्ता कवीन्द्रः।।

कुरुकुलकलगाथां, चित्रयन् चारुकाव्ये,
सुखदभगवद्गीतां कृष्ण-वाण्या च गीत्वा।
सुमधुरसुरवाणीं, श्रद्धया सेवमानः,
जगति मुनिवरः सः, व्यासनाम्नो महात्मा।।

भुवनविदितहासो, भासते भासरूपे,
कविकुलगुरुभूतः कालिदासः प्रसिद्धः।
ललितपदनियोगे, गीतगोविन्दकारः,
सकलकविजनैर्या श्रद्धया सेविताऽभूत्।।

निखिलकविकुलं सेवस्व गीर्वाणवाण्याः,
अविदितरचना किन्तु ह्यमीषां कवीनाम्।
सुविदितकलकीर्तिर्दण्डिबाणादिभिश्च,
सुफलितसुरवाणी, सर्वभाषासु मध्ये।।

अविकलनिधिभूता, ज्ञान-विज्ञानराशेः,
सकलरसयुता या, काव्यधारानुगीता।
सुरसरिसमसेव्या, संस्कृता श्रेष्ठभाषा,
भरतभुवि समृद्धा भारती भारतानाम्।।

न खलु न खलु सेव्यः, संस्कृताऽऽशून्यदेशः,
न खलु न खलु गेयं देवभाषाविहीनम्।
सुविदितसुरभाषा शिक्षणीया सदैव,
विरहितसुरवाणी, स्वर्गभूमिर्न सेव्या।।

जयतु जयतु भव्या संस्कृता विश्वभाषा,
जयतु जयतु दिव्या संस्कृति-प्राणधारा।
जयतु जयतु ज्योतिर्जन्मिनामार्यजातेः,
जयतु च सुरवाणी भारती भारतानाम्।।

संस्कृत-दिवसे सभ्याः, स्मरन्ति सुरभारतीम्।
प्रयोगे चेद् भवेन्नित्यं, भूयात् भास्वर-भारतम्।।

**पूर्व-प्राचार्यः,**
**कुसुम कुलाय, सूर्यनगरम्,**
**अजीतमल ( औरैया ) उ.प्र. 206121**
**मो.- 9759341878**

# प्रह्वं प्रतिनिवेदनम्

❑ डॉ. सत्यव्रत वर्मा

भारत्या जनवरीमासाङ्के पृ. 12-14 (वर्ष 70 अङ्क 3) प्राकाश्यमितां विद्वद्धौरेयाणां श्रीनारायणकाङ्कर-महाभागानां जिज्ञासां विज्ञाय, प्रपठ्य नानाभावानां गमनीयोऽहमभूवम्। अहो, धन्या खलु ते तपःपूता ब्रह्मैकाराधनव्रता द्विजपुङ्गवा ये चरमे वयस्यपि नव नव ज्ञानामृतं निपीय जीवनम् अन्वर्थतां नेतुं कृताध्यवसायाः। सत्यं, यया वाचा कोऽपि वाङ्मयः प्रणीतस्तां सर्वात्मना धिय्यनिधाय तस्याः प्रकृतिं भङ्गिमाश्चाविज्ञाय व्याकरण-ञ्चानवगाह्य साहित्यहार्दग्रहणं सुदुश्शकम्। किन्तु यादृशं सर्वाङ्गनिर्भरं सकलविषयगमकं वैदिकव्याकरणं काङ्करमहाभागैरिष्यते तादृशं नाद्य पर्यन्तं केनचिद्विरचितं न च निश्चयितुमलं कश्चित्। परमसत्यपीदृशे व्याकरणरत्ने देशे-विदेशे वेदाध्ययनं विप्रकृष्टादतीतात् प्रवर्तते। पाणिने-वैदिकप्रक्रियां कालान्तरे च यूरोपीयपण्डितानां व्याकरण-ग्रन्थानुपजीव्य वैदिकवाङ्मयस्य गभीरं शीलनमनुशीलनं च विश्वे प्रवृत्तम्, ईदृक्षा वेदविद्याकोविदाश्च भूता येषां विदुरतायास्तुलां विरला एवारोढुं पारयन्ति, एतादृशा ग्रन्थाश्च निबद्धा ये देशकालाद्यपरिच्छिन्नं शाश्वतिकं सार्वभौमं गौरवं च बिभ्रति। काङ्करवर्याणां तातपादैस्तेषां गुरुपादैश्च वेदवाचि यदप्रतिमं वैदुष्यम् अधिगतं तदपि नारायणमहाभागैरीप्सितं व्याकरणग्रन्थम् ऋते एवाभूत्।

कश्चिच्चेत् कदाचित् काङ्करमहाभागपरिकल्पितं वैदिकव्याकरणं 'निर्मातुं' प्रभवेत् तदपि कोऽपि भुवि वेदमन्त्राणां तमेवार्थं कर्तुं न प्रभविष्यति यो मन्त्रकृतामभीष्टो नितरां निरवद्यः सर्वाभ्युपगतश्च स्यात्। अद्य वेदविदां मूर्ध्नि स्थितो बुधोऽपि सप्रत्ययम् अभिधातुं नालम् मत्कृतोऽर्थ एव मन्त्रकृतो भावं सकलभंगीसहितं सर्वात्मना प्रख्यापयति, इतरे सर्वेऽर्थाश्चाननुकूला मिथ्या वा सन्ति। मन्त्रार्थकरणे द्वयोरपि बुधयोर् मतैक्यं न विलोक्यते। प्राञ्चो भाष्यकारा अपि स्वाभिमतां पद्धतिम् अनुसृत्य यथामति मन्त्रार्थं चक्रिरे, सुदूरं च ते विप्रतिपद्यन्ते। नेदमाश्चर्यकरम्। इतो वर्षसहस्रत्रयपूर्वमपि मन्त्रहार्दं सुज्ञेयं नाभूत्। भाष्यकारा अर्थकाराश्च स्वदृशा वेदार्थं वितेनिरे येन मन्त्रविमर्शविधिः संकुलप्रायः विपर्यस्तकल्पश्च जातः। मन्त्राणाम् अर्थभेद-स्तथा चण्डोऽभूत् यत् कौत्सस्तारस्वरेण चक्रन्द 'अनर्थका हि मन्त्राः'। अनर्थका अनिश्चितार्थकाः। उदिते नवे ज्ञानविज्ञाने साम्प्रतमपि मन्त्रार्थकरणे पूर्ववत् विप्रतिपद्यन्ते कोविदाः। प्राक्षु भाष्यकारेष्वनल्पं वैमत्यं दृश्यत एव।

यथार्थं वेदार्थं प्रतिपित्सुः पाठकोऽर्थभेदप्रतिहतबुद्धिः सन् यन्त्रारूढ इव भ्राम्यति। तच्च वेदमन्त्रदुर्ज्ञेयतां सुतरां व्यनक्ति प्रमाणयति च सत्स्वपि सर्वविधोपजीव्येषु मन्त्राणां मन्त्रकृद्दृष्टमर्थं कर्तुं प्रायेणाशकम्। गतेषु वर्षेषु द्वौ प्रथितौ वेदविज्ञौ ऋग्वेदस्य मर्म प्रकाशयितुं महान्तं प्रयत्नं कृतवन्तौ। दुर्दैवाद् डॉ. रामगोपालकृत आँग्ल्यनुवादस् तेषां स्वर्गारोहणात् पूर्तिं नागात्। ते प्रथमं मण्डलचतुष्कमेव टिप्पणीविमर्शादिसहितम् अनूदितुं प्राभवन्। वेदविद्योप-करणीकृतकाया अस्मत्सुहृद्वर्य्याः श्रीजियालालकम्बोज-महाभागा विंशतिवर्षैर्बृहत्कायैरष्टखण्डै ऋग्वेदस्य मन्त्रपाठ-पदपाठ-टिप्पणी-विमर्शादिभिः सध्रीचीनं सम्पादनं हिन्द्या तस्योपासनापरं पदानुगं भाषान्तरं चाकार्षुः। डॉ. रामगोपालमहाभागैः साम्प्रतिक्या पद्धत्याऽनुवादोऽ-कारि। स्वभावतो विद्यते भूयान् भेदस्तयोर्द्वयोः। कोऽप्यनुवादो न सर्वात्मना निरवद्यः कथयितुं शक्यते, न च सावद्यः। एकया दृशैको निर्दुष्टः, अपरया चेतरः। अहो विडम्बना वेदार्थकृताम्।

**7/34, पुरानी आबादी, नामदेव फ्लोर**
**मिल के पास, श्रीगङ्गानगर-335001**

# भारतीयशिक्षाव्यवस्थायाम् अन्तर्जालशिक्षणप्रणाली

❑ डॉ. कुलदीपसिंहः

**'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते'** इति गीतोक्त्या ज्ञानं अज्ञानावृतचेतसः संस्कारं कृत्वा पात्रतामादधाति, ततश्च विवेकाविवेकयोः भेदः प्रस्फुटितो भवति, सन्मार्गे नियोगो भवति। एतच्च मनुजस्य तृतीयं नेत्रं वर्तते। अनेनैव नेत्रेण परमपुरुषार्थस्यावाप्तिर्जायते। प्रपञ्चे कथं व्यवहारः विधेयः? इति जिज्ञासायां ज्ञानमेव साधनमिति निर्गच्छति। परं केवलं ज्ञाने प्राप्ते सति मानवजीवनं भव्यमिति नोचितम्, ज्ञानानुगुणं क्रिया अपि स्यादतो **'ज्ञानं भारः क्रियां विना'** इति स्पष्टमेव। क्रियासु नैपुण्यं सम्पादनाय शिक्षणं भवति। शिक्षणं नियन्त्रितावस्थासु निश्चितोद्देश्यानां प्राप्तये प्रदीयमानम-भिप्रेरणम् निर्देशनञ्च भवति।

प्राचीनकालादेवास्माकं देशे गुरुकुलानि शिक्षण-केन्द्राण्यासन् यत्र आचार्याः स्वशिष्येभ्यः शास्त्रीयज्ञानेन साकं लौकिकं पारलौकिकञ्च सर्वविधं ज्ञानमुपकल्प-यन्ति स्म। परमधुना समयः परिवर्तितः गुरुकुलानां स्थाने विद्यालयाः, महाविद्यालयाः विश्वविद्यालयाश्च आविष्कृताः। एतेषु छात्राणां रुच्यनुगुणं विषयान् विभज्य केवलं त एव विषयाः पाठ्यन्ते यान् छात्रः चिनोति, वर्षान्ते वार्षिकीं उत अर्द्धवार्षिकीं परीक्षां लिखित्वा श्रेणीं च लभते।

परमिदानीं कालः परिवर्तितः। विद्यालयाः, महाविद्यालयाः विश्वविद्यालयाश्च सन्तोऽपि तत्र शिक्षाप्रणाली परिवर्तिता। कक्षाकक्षस्थाने छात्राः गृहे एव तिष्ठन्तु अथवा कक्षापरिमाणस्य चतुर्थांशयुता एव छात्राः विद्यालयेषु आगेच्छेयुरिति नियमानुगुणं शिक्षणं स्यादिति सम्भाव्यते। अतः 'अन्तर्जाल' (Online) शिक्षण-मिदानीं सर्वैरेव शिक्षकैराश्रीयते। 'सेमिनार' (संगोष्ठी) स्थाने 'वेबिनार' (Web संगोष्ठ्यः भवन्ति। इत्थं भारते शिक्षणव्यवस्थायां सूचनासम्प्रेषणयोः प्रविधेरनुप्रयोगः बहुशः जायमानो वर्तते।

**1. शिक्षाक्षेत्रे अन्तर्जाल ( Online ) शिक्षणप्रणाली** - जीवनस्य प्रत्येकं क्षेत्रे ICT (Information Communication Technology) सूचनासम्प्रेषण-प्रविधेः प्रयोगः दृश्यते।

गतेभ्यः विंशतिवर्षेभ्यः अस्मिन् वृद्धिर्जायमाना अस्ति। शिक्षणे दृश्यमानं परिवर्तनं अस्यैव फलमिति स्पष्टमेव। अत्र शिक्षकः 'वेब' (WEB) इत्यनेन छात्रैस्सह सम्बद्धो भूत्वा स्वपाठं पाठयति। तस्य सजीवं प्रसारणमपि भवति। प्रत्यक्षतया छात्राः जिज्ञासापुरस्सरं स्वमतमप्युपस्थापयन्ति। अन्तर्जालशिक्षणे ई-पाठाः (Online Lessons), बहुमाध्यमानि (Multi-media), अनुप्राणनप्रविधिः (Animation Technology) इत्यादयोऽन्तर्भवन्ति। सम्प्रेषण-माध्यमानां विस्तारेण ग्रामेष्वपि अन्तर्जालस्य (Internet) उपलब्धता अस्ति। अन्तर्जालशिक्षणे अधिगमाय छात्रशिक्षकयोः एकत्रोपस्थितिर्नापेक्षते। समयस्य निर्धारणमपि सौविध्यानुगुणं भवति, फलतः स्वतन्त्रतया शिक्षणाधिगमप्रक्रिया प्रवर्धते। बालकाना-मावासस्य भोजनस्य, वातावरणं प्रति अननुकूलनस्य च समस्याः न भवन्ति। कदाचित् छात्रः रुग्णो भवति, विद्यालयमागन्तुं न प्रभवति परम् अत्र तथा नास्ति, बालकः रुग्णावस्थायामपि केवलं श्रवणेन विषयेण साकं सम्बद्धो भवति तथा आरोग्ये सति अल्पेनैव प्रयासेन विषयमवगच्छति। अत्र पाठ्यसामग्री अंकरूपिता (Digitalization) भवति यया छात्राः झगिति स्वेष्टविषयं पृथक्कर्तुं शक्नुवन्ति।

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयेन 'स्वयम् (SWAYAM)' इति नामधेयः (Study Webs of Active learning for Young Aspiring Minds) तंत्रांशः प्रस्तुतीकृतः।

अत्र द्विसहस्राधिकपाठ्यक्रमाणां अशीतिसहस्र-घण्टात्मकः शिक्षणाधिगमः प्रवर्तितो वर्तते। यश्च विभिन्नेषु स्तरेषु अधीयानेभ्यः छात्रेभ्यः उपकारको वर्तते। अत्र चित्र-ध्वनिमुद्रितसामग्री (Video), अव-बोधकीयपाठाः (Tutorials), ई-सामग्र्यः (E-content) इत्यादीनामपि समावेशोऽस्ति।

अपरञ्च 'स्वयं प्रभा' '(Swayam Prabha)' इति शैक्षिकदूरदर्शनकार्यक्रमाणां कश्चन समूहो वर्तते यः UGC, CEC, IGNOU, NCERT, NIUS इत्यादिभिः निर्मितसूचनानां, सामग्रीणाञ्च प्रसारणं करोति।

UG/PG MOOCS (Massive Open Online Cources) - स्नातकछात्रेभ्यः स्नातकोत्तरछात्रेभ्यश्च संस्थागतसीमायाः छात्रान् पृथक् करोति, इदं शिक्षणं यत्र एम (M) = वृहद्नामांकनसंख्या, ओ (O) = काऽपि अनिवार्ययोग्यता नास्ति सर्वेभ्यः अवसरः, ओ (O) = पूर्णान्तर्जालप्रणाली, सी (C) = संरचितपाठ्यक्रम-सामग्री। इत्थमसीमितप्रतिभागिभ्यः वेबाधारितमुक्तो-पयोगाय अन्तर्जालिकोऽयं (Online) पाठ्यक्रमोऽस्ति। 'MOOC' इत्यस्य ध्येयवाक्यमस्ति '(A,A,A)' कदापि, कुत्रापि, कोऽपि (Anytime-Anywhere, Anyone) इति। MOOCs इत्यस्य कार्यक्रमस्य संयोजकसंस्थाः सन्ति - UGC, NPTEL, Consortium for Educational Communication (an IUC of UGC), IGNOU, NCERT, NIOS, IIM Bangalore, NITTTR Chennai). **E-PG Pathshala** : अन्तर्जालिकपाठ्यक्रमेषु अयमपि वर्तते यस्मिन् चतुर्षु (Quadrants) भागेषु ई-पाठ्यसामग्री प्रस्तुता भवति। **OER (Open Educational Resources** (मुक्तशिक्षास्रोतांसि): अस्याः उपयोगः छात्रस्य स्वाधिगमाय वर्तते। प्रकारान्तरेण इयं प्रणाली शाखीयाभिक्रमानुदेशमनुसरति, अत्र कापि शिक्षकसहायता नोपलभ्यते। परं 'MOOCS' इत्यस्मिन् छात्रशिक्षकयोः कश्चन समूहो भवति।

**2. अन्तर्जालिकशिक्षणाधिगमप्रणाल्यां सम्मिलित-तत्त्वानि**- साम्प्रतं संगणकयन्त्रं (Computer) चलदूरभाषयन्त्रं (Mobile) च प्रायः प्रत्येकं गृहे वर्तेते। ग्रामेष्वपि एतेषामुपलब्धता प्रचुरतया अस्ति। अन्तर्जा-लिकशिक्षणाधिगमाय एतयोः आवश्यकता भवत्येव। ई-पाठाः (e-Lessions), Multimedia, 3D Technology इति च अनयोः महत्त्वपूर्णे अंगे भवतः। वैज्ञानिकसिद्धान्तान्, प्रविधिसिद्धान्ताँश्च ई-माध्यमेन सहजतया पाठयितुं शक्नुमः। शिक्षकोऽस्यां प्रणाल्यां 'WEB' इत्यनेन छात्रैस्सह सम्बद्धो भूत्वा एकस्मिन् अहनि कदापि छात्राणां जिज्ञासानां समाधानं कर्तुं शक्नोति। अभ्यासकार्यमपि दातुं शक्नोति। इत्थमियं प्रणाली एकं एकं प्रति (One to One) इति सम्प्रेषण-सूत्रमनुसरति। विभिन्नानां पाठ्यक्रमाणां संचालनमपि अनया कर्तुं शक्यते।

ई-अधिगमप्रतिमानं (e-learning Module), ई-संसाधन (e-Resource), ई-अवबोधकीयपाठाः (Online Tutorials) अस्यामेव प्रणाल्यामन्तर्भूता-स्सन्ति। विभिन्नपुस्तकानामपि अवलोकनं कर्तुं शक्नोति, बहूनि पुस्तकानि National Digital Library, Archives इत्यादिषु उपलभ्यन्ते।

अन्तर्जालिकमूल्यांकनमपि (Online Assessment) भवति। बह्व्यः परीक्षाः अन्तर्जालद्वारा आयोज्यन्ते। देहलीविश्वविद्यालयः जवाहरलालनेहरू विश्वविद्यालयश्च ''UGC Guidelines on Examination and Academic Calender for the University in View of COVID-19

Pandemic and Subsequent Lock Down" इत्यस्य परिप्रेक्ष्ये ऑनलाइन परीक्षाणामायोजनस्य विषये योजनां कुरुत:।

**3. अन्तर्जालिकाधिगमपद्धत्यापेक्षितानि परिवर्तनानि**= ई- संसाधनानां प्रयोगेण निम्नाङ्कितानि परिवर्तनानि अपेक्षन्ते-

(1) बहुमाध्यमाधारिताधिगम: (Multimedia Learning) सर्वेभ्य: स्तरेभ्य: स्यात् अर्थात् अधिगमकर्त्ता वाञ्छितसूचना: प्राप्नुयात्।

(2) अधिगमकर्त्ता उच्चदक्षतां प्राप्तुं प्रयतेत।

(3) प्रवेशपरीक्षा:, प्रमाणपत्राणि, मूल्यांकनमित्यादीनि अन्तर्जालाधारितानि स्यु:।

(4) पाठ्यपुस्तकानां स्थाने संगणयितृयन्त्रस्य (Computer) फलकयन्त्रस्य (Tablet) च उपयोगं कुर्यु: छात्रा:।

(5) शिक्षणं केवलं अन्तर्जालमाध्यमाधारितमेव स्यात्।

(6) शिक्षणसंस्था: शिक्षणकेन्द्रेभ्य: (Teaching Centers) अधिगम-संसाधनकेन्द्रेषु (Centre of Learning Resources) परिवर्तितानि भवेयु:।

**4. अन्तर्जालाधारितशिक्षणव्यवस्थाया: आवश्यकता** - 'AISHE' इत्यनया संस्थया 2018-19 तमे वर्षे स्वकीये प्रतिवेदने उल्लिखितं यत् उच्चशिक्षायां नामांकने वृद्धि: सञ्जाता, अत: आधुनिकपरिप्रेक्ष्ये भारतीयशिक्षा-प्रणाल्यां नवाचाराणामावश्यकतानुभूयते। काश्चनावश्य-कता: निम्नाङ्कितास्सन्ति-

(1) छात्राणां संख्याभिवृद्धौ सत्यां शैक्षिकावश्यकतानां पूर्त्यर्थम्।

(2) भौतिकसंसाधनानाम् अनुभवयुतानां शिक्षकाणाञ्चा-भावपूर्त्यर्थम्।

(3) वैश्विकस्तरे ज्ञानस्याजस्रप्रवाहाय।

(4) ज्ञानस्य सार्वभौमिकताकरणाय।

(5) छात्रा: स्वगत्या अध्ययनं कृत्वा विषयमवगच्छेयु:।

(6) छात्र-शिक्षका: स्वावश्यकतानुगुणं समयानुकूलञ्च अधिगमं कर्तुं शक्नुयु:।

(7) अन्तर्जालस्योपयोग: सम्बन्धितपाठ्यसामग्र्या: विस्तृताध्ययनाय स्यात्।

(8) ऑनलाइनशिक्षणस्य प्रक्रिया सरला सहजप्राप्ता च वर्तते।

(9) आर्थिकदृष्ट्या न्यूने व्यये इदं शिक्षणं भवितुमर्हति। शैक्षिकसंसाधनेषु जायमानं व्ययं न्यूनीकृत्य शारीरिक-विश्रान्तेरपि वारणमत्र भवति।

(10) बालिकाभ्य: इदम् उच्चशिक्षावसराना-विष्करोति। ग्रामेषु यत्र रूढिवादिन्य: विचारधारा: वर्तन्ते तत्रापि अनेन शिक्षणेन सहजतया बालिका: उच्चशिक्षा-मवाप्नुवन्ति।

(11) कृत्वाधिगम: (Learning by Doing) इति मनोवैज्ञानिकसिद्धान्तमनुसरति।

(12) येषां छात्राणां पारिवारिकपृष्ठभूमि: औपचारिक-शिक्षायै अवसरं न प्रयच्छति तेषामिदं शिक्षणं महदुपकरोति।

(13) भारतदेशे जनसंख्याया: अनुगुणं शिक्षायै केन्द्राणि न सन्ति, फलत: अन्तर्जालाधारितशिक्षणं महदुपकरोति।

यू.जी.सी. द्वारा 'MOOCS' इत्यस्मिन् कार्यक्रमे पाठ्यक्रमनिर्माणे शिक्षकेभ्य: अङ्कानां प्रावधानं कृतम्। अर्थात् ये शिक्षका: अस्मै कार्यक्रमाय पाठान् निर्मान्ति तेभ्य: (API) अङ्का: प्रदीयन्ते।

**5. अन्तर्जालाधारितशिक्षणे अनुभूयमाना: समस्या:-** अन्तर्जालाधारितशिक्षणस्य सीमाङ्कनविषये 'क्लिफोर्ड स्टॉल' (Clifford Stoll) महोदय: कथयति- "Few aspects of daily life required computer digital networks or massive connectivity. They are irrelevant to working, driving, visiting, Negotiating, eating, hiking,

dancing, speaping and gossiping इत्येवं प्रकारेण निम्नाङ्कितास्समस्या: अनुभूयन्ते-

(1) छात्राणां पृष्ठभूमि: अर्थात् केचन छात्रा: अत्यन्तं निर्धनास्सन्ति। तेषां पार्श्वे एतादृशान्युपकरणानि न सन्ति।

(2) अन्तर्जालसाहचर्याभाव: (Lack of Internet Coverage)।

(3) अन्तर्जालशिक्षणाधिगमप्रणाली विश्रान्त्युत्पादिका, शुष्का, अरुचियुता च वर्तते। बहुकालं यावत् छात्रा: एतेषामुपकरणानां प्रयोगं न कर्त्तुं शक्नुवन्ति।

(4) शरीरे मनसि च एतेषां दुष्प्रभावो भवति।

(5) अन्यदेशानामपेक्षया भारतदेशे 'Internet' अन्तर्जालस्य शुल्कमधिकमस्ति।

(6) उपयोगकर्त्तु: निजताया (Privacy) हननं भवति, अन्तर्जाले प्रदत्तांशा: सर्वत्र प्रसारिता: भवन्ति, कदाचित् आर्थिकहानिरपि भवितुमर्हति।

(7) बहूनां छात्राणां गृहस्य वातावरणं अन्तर्जाल-शिक्षणाधिगमाय प्रतिकूलं वर्तते।

(8) विशिष्टबालकेभ्य: अस्योपयोग: क्लेशाय भवति।

(9) शैक्षणिकसंस्थासु शिक्षणायोपयुज्यमाना-नामुपकरणानामुपलब्धिर्भवति परं गृहे अन्तर्जाल-शिक्षणाय तावन्मात्राण्युपकरणानि न भवन्ति।

(10) पारम्परिकशास्त्राणामध्यापनाय इयं प्रणाली नोपयुज्यते।

(11) हिन्दीमाध्यमभाषाया: छात्रेभ्य: अन्तर्जाले शिक्षणाधिगमसामग्र्या: अभाव:।

(12) ग्रामेषु विद्युदापूर्त्यभाव:।

(13) गृहेषु छात्रसंख्यानुगुणम् अन्तर्जालोपकरणानाम-भाव:।

(14) निर्धनबालकेषु संसाधनानामभावे मान-सिकावसाद-संघर्षादीनां विकाराणां विकास: समुदाये विभेदश्च।

(15) अन्तर्जालशिक्षणाधिगमप्रक्रियायां छात्रेषु सहयोग-समरसता-सहिष्णुता-सामाजिकता-एकतादीनां मानवीयमूल्यानां विकासो न सम्भवति।

इत्थं समसामयिकपरिप्रेक्ष्ये अन्तर्जालाधारित-शिक्षणाधिगमप्रक्रियाया: आरम्भ: जातो वर्तते भाविनि काले च अस्यामभिवृद्धिरपि भविष्यति।

यद्यपि मूल्यांकने विशेषतया निबन्धात्मकप्रश्नानां परीक्षणार्थं प्राय: अत्र न्यूनता दृश्यते, परं लघूत्तरात्मक-प्रश्ना: अत्र प्रष्टुं शक्यास्सन्ति।

तथापि सामाजिकसंरचनामाश्रित्य इयं नवीनशिक्षा-पद्धतिर्नितरां प्रयोगार्हा इति कोविदानामभिमतम्।

**संदर्भ ग्रन्थसूची** -

1. GOI (2009) : Facing global and local challenges : The new Dynamic for Higher Education. Ministry of Human Resource Development.

2. UGC (2009) : Higher education in India : Issues related to Expansion, Inclusiveness. Quality and Finance. UGC Publication.

3. Jennifer L Geary : Virtual Tutoring and Student Support System, Journal of Education Technology. Vol. 2 No. 1, P. 60 Jan, 2005, Nagarcail, Tamilnadu.

4. Balasubramaniam K. : ICT in Development : Human Resource Development in Govt. Department, Educomm Asia, Vol. 10 No. 1, Sept 2004, COL, CEMCA, New Delhi.

5. Report on Communication for Developments in the information age by the Dept. of extension education BHU Varanasi.

Websites :

- MHRD : http://education.nic.in
- UGC : http://www.ugc.ac.in/index.html
- CEC : cec.nic.in

**सहायकाचार्य:,**

**शिक्षाशास्त्रविभाग:,**

**ज.रा. राजस्थान-संस्कृतविश्वविद्यालय:, जयपुरम्**

# लक्षणाविचारः

❑ मदन सुमरा

सर्वेष्वपि शास्त्रेषु शब्दार्थयोः सम्बन्धस्वरूपवृत्ति-निरूपणं स्वस्वशास्त्रसिद्धान्तमर्यादानुगुणं क्रियते। अलंकारनये च सा त्रिविधा स्वीकृता अभिधा, लक्षणा व्यजंना चेति[1]। तत्र संकेतितार्थगोचरः अर्थस्य शब्दगतः शब्दस्य अर्थगतो वा सम्बन्धविशेषः अभिधा[2]। शक्यसम्बन्धो लक्षणा[3] इति लक्षणा-लक्षणम्। अत्र अभिधावृत्तिबोध्यः अर्थः वाच्यः शक्यश्च कथ्यते। तस्य च शक्यार्थस्य अन्येन तात्पर्यविषयीभूतेन अर्थेन सह सम्बन्धः लक्षणा। स च सम्बन्धः अनेकधा। यथा- 'गंगायां घोषः' इत्यादौ शक्यस्य प्रवाहस्य तीरे सामीप्यसम्बन्धः। मुखं चन्द्रः इत्यत्र सादृश्यसम्बन्धः एवं तीरे विद्यमानस्य शक्यप्रवाहसम्बन्धस्य एव लक्षणा इति नाम। एवं प्रवाहसम्बन्धितीरमित्याकारकं लक्षणाज्ञानं लक्ष्यार्थस्य तीरस्य उपस्थितौ हेतुः। पुनः तादृशो-पस्थितिद्वारा सा लक्षणा गंगापदात् तटसम्बन्धितीर-विषयक-शाब्दबोधे कारणं भवति।

तस्याश्चार्थोपस्थापनकरणे न केवलम् अन्वयानुप-पत्तिः, न वा केवलं तात्पर्यानुपपत्तिः बीजम्[4]। तथा हि गङ्गायां घोषः इत्यादिस्थलेषु शक्यतावच्छेदकप्रवाहत्वेन रूपेण लक्ष्यस्य तीरस्य बोधः। यतः प्रवाहत्वव्याप्यस्य शैत्यपावनत्वस्य तीरे प्रतीतिः, तत्र तीरे प्रवाहत्वज्ञानं विना न संभवति। अतः तीरे वृत्तेः घोषान्वयितायाः अवच्छेदकता मुख्यार्थतावच्छेदके प्रवाहत्वे विद्यते एव परन्तु न तत्र अभावः। तात्पर्यविषयान्वयितावच्छे-कताभावः न लक्षणायाः अर्थोपस्थापकत्वे कारणम्।

गङ्गायां घोषः इत्यत्र मुख्यार्थतावच्छेदकरूपेण प्रवाहत्वेन मुख्यार्थस्य प्रवाहस्य प्रतियोगिता मीनशैवालाद्यन्वये, न तु तात्पर्यविषये घोषान्वये। अतः अत्र तात्पर्यविषयघोषान्वये मुख्यार्थतावच्छेदकप्रवाहत्वेन रूपेण मुख्यार्थप्रतियोगिकतायाः अभावः इति उक्तप्रकारेण लक्षणासंगतिः। पुनः काकेभ्यो दधि रक्ष्यतामित्यत्र काकस्य दधिरक्षायां सर्वथा अन्वयाभावः नास्ति। परं काकत्वेन काकस्य दधिरक्षायां नान्वयः अपि तु दध्युपधातकत्वेनैव अन्वयः। एवं च दधिरक्षासम्बन्ध-स्य प्रतियोगिकता काके, किन्तु प्रतियोगिकतावच्छेदकं न काकत्वम् अपि तु बिडालमूषकादिसाधारणं दध्युपघातकत्वम्। तथा चात्र मुख्यार्थतावच्छेदक-काकत्वरूपेण तात्पर्यविषयदधिरक्षान्वये मुख्यार्थकाक-प्रतियोगिकतायाः अभावः। इत्थं तात्पर्यानुपपत्तिरेव लक्षणायाः कारणत्वे बीजम्। तस्मात् लक्षणायाः नियामकतया रूढिप्रयोजनयोः एकतरं च तात्पर्यानुपपत्त्या सह कारणं भवति।

अत्र प्राचीनाः -

**शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।**
**अर्थावसेयस्य पुनः लक्ष्यमाणत्वमुच्यते।।**
**शक्यसम्बन्धेन अशक्य ( प्रतीति ) प्रतिपत्तिः लक्षणा।।**
**मुख्यार्थबाधात् अन्योऽर्थः यल्लक्ष्यते सा लक्षणा।। इति वृत्तेः**

लक्षणानि न युज्यन्ते। यतः बोधस्य कारणमेव लक्षणादि,

न तु तत्स्वरूपं एव। प्राचीनास्तु बोधस्वरूपत एव लक्षणां लक्षितवन्तः इति दोषः। यदपि ''मुख्यार्थ-सम्बन्धेन शब्दस्य प्रतिपादकत्वम्''[5] इति वृत्तिवार्तिके

1 वृत्तिवार्तिकम्, 2 रसगंगाधरः द्वितीयपरिच्छेदः
3 रसगंगाधरः द्वितीयपरिच्छेदः 4 रसगंगाधरः

लक्षणा लक्षिता तदपि न सङ्गच्छते। अत्र आत्माश्रयरूपः दोषः विद्यते। तथाहि प्रतिपादकत्वं नाम प्रतिपत्तिनिष्ठ-धर्मविशेषः परन्तु तादृशधर्मविशेषज्ञानं कस्यापि अर्थस्य उपस्थितौ कारणं न भवति। यतः एतत्पदनिष्ठं प्रतिपादकत्वमस्तीत्यनेन ज्ञानेन न कस्यापि अर्थस्य स्मृतिः, तस्मात् कथं नाम प्रतिपादकत्वं लक्षणायाः लक्षणम्? अथ यद्युच्येत प्रतिपादकत्वं नाम प्रतिपदानुकूलव्यापारः, स च ज्ञातः सन्नेव उपयुज्यते प्रतिपत्ताविति, तथापि मुख्यार्थसम्बन्धेन इति लक्षणघटकतृतीयान्तपदेन शक्यसम्बन्ध एव प्रतिपत्तिहेतुत्वेन विवक्षित इति प्रतीयते। तेन प्रतिपत्तिहेतुभूतया वाक्यसम्बन्धरूपया लक्षणया प्रतिपादकत्वं लक्षणा इति पर्यवसन्नं लक्षणम्। अत्र लक्षणाज्ञाने लक्षणाज्ञानस्यैव हेतुत्वात् आत्माश्रयरूपो दोषः।।

इयं च लक्षणा द्विविधा-निरूढा, प्रयोजनवती[6] इति। अनादिप्रयोगप्रवाहवशेन एकवस्तुप्रवणत्वात् शब्दस्य अन्यार्थे रूढत्वम् निरूढा। अत्र लावण्यानु-कूलानुगुणादयः उदाहरणम्। प्रयोजनवती पुनः गौणी शुद्धा इति द्वेधा। गौणी-लक्षणा सारोपा साध्यवसाना इति द्विविधा। तत्र विषयविषयिणोः पृथङ्निर्दिष्टयोः अभेदः आरोपः। यत्र लक्षणायामारोपः सा सारोपा। अत्र मुखं चन्द्रः इत्यादीनि उदाहरणानि।

विषयिप्रतिपादकैः चन्द्रादिशब्दैः लक्षणया उपस्थापितानां चन्द्रादिसदृशानाम् अभेदसंसर्गेण मुखादिशब्दोपस्थापितैः मुख्यत्वादिविशिष्टैः मुखादिभिः अन्वयः। यतः निपातातिरिक्तानामर्थयोः अभेदातिरिक्तः सम्बन्धः नोपपद्यते। एवमत्र मुखचन्द्रयोः पृथङ्निर्दिष्टयोः विषयविषयिणोः सादृश्यप्रयोजनात् अभेदान्वयः। अतः अत्र गौणी सारोपा लक्षणा। एवम् अपृथङ्निर्दिष्टे विषये विषय्यभेदः अध्यवसाना[7]। साध्यवसानायाः पुरेऽस्मिन् सौधशिखरे चन्द्रराजी विराजते इत्युदाहरणम्। सौधशिखरस्थितौ मुखत्व-विशिष्टमुखप्रतियोगिकता, अत्र चन्द्रप्रतियोगिकत्वा-भावः। चन्द्रत्वेन अत्र मुखत्व-विशिष्टस्य लक्षणया बोधात् सौधशिखरस्थित्यन्वयः।

शुद्धा पुनः जहत्स्वार्था अजहत्स्वार्था सारोपा साध्यवसाना इति चतुर्विधा। गङ्गायां घोषः इत्यत्र गङ्गापदं प्रवाहरूपमर्थं जहाति लक्षणया तीरं बोधयतीति जहत्स्वार्था इयं लक्षणा। काकेभ्यो दधि रक्ष्यतामित्यत्र काकशब्दः मुख्यार्थत्यागं विनापि दध्युपघातकं सर्वं लक्षयति इत्यत्र अजहत्स्वार्था लक्षणा।

दर्पणकारैः यल्लक्षणायाः अशीतिः भेदाः प्रपञ्चिताः[8] तत् लक्षणाया विशुद्धस्वरूपविश्लेषणात्मिकया दृष्ट्या कृताः। काव्यप्रकाश-रसगंगाधरादिषु तु अस्या द्वित्राधिकदशभेदा एव परिगणिताः। अत्र तु लक्षणाविचारः सर्वथा काव्यचमत्कृतिमाधारीकृत्यैव कृतः। तस्मात् अलंकारशास्त्रोपयोगिन एव भेदा अत्र उक्ताः। अत एव जहदजहत्स्वार्थापि लक्षणा अलंकारशास्त्रे अनुपयोगिनी नात्र आलंकारिकैः सा स्वीक्रियते। निरूढालक्षणाभेदेऽपि आलंकारिकाणाम-रुचेः कारणं तस्य चमत्कृत्यनाधायकत्वमेव। निरूढायाः न व्यंजने उपयोगः, न वाऽलंकारे।

गौणी- सारोपायाः रूपके, साध्यवसानायाः अतिशयोक्तौ, शुद्धा- सारोपायाः साध्यवसानायाश्च हेत्वलंकारे, जहत्स्वार्थायाः अत्यन्ततिरस्कृतवाच्यध्वनौ, अजहत्स्वार्थायाः अर्थान्तरसंक्रमितवाच्यध्वनौ च उपयोगः।

**शोधच्छात्रः**

**साहित्य-विभागः,**

**ज. रा. राजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्**

5 वृत्तिवार्तिकम् 6 काव्यप्रकाशः।

7 चित्रमीमांसा-रूपकप्रकरणम् 8 साहित्यदर्पण-द्वितीयपरिच्छेदः

# सूक्ति-सुधा

❑ डॉ. प्रेमचन्द्रांवका, आचार्यचर:

(15 शताब्द्याम् आचार्यसकलकीर्तिरचितसुभाषितरत्नावलीत: )

**जातश्चैको मृतश्चैक: एको धर्मं करोति च।**
**पापं स्वर्गसुखे जीव: श्वभ्रे गच्छति क: सम:।।1।।**

– यह जीव अकेला ही उत्पन्न होता है, अकेला ही मरता है और अकेला ही धर्म करता है। अकेला ही पाप करता है और अकेला ही स्वर्ग सुख (भोगता) है। अकेला ही नरक जाता है, कोई साथ नहीं जाता।

**मूढा: कुर्वन्ति ये वै मे वपु: पुत्रगृहादिकम्।।**
**तेऽपि त्यक्त्वा च रोगार्ता मज्जन्ति भवसागरे।।**

– जो मूढ़ मनुष्य शरीर, पुत्र, गृह आदि को अपना मानते हैं वे भी उन्हें छोड़कर, रोग से पीड़ित हो संसार सागर में डूबते हैं।

**अन्यो जीवो भवेद्यत्र देहात्तत्र गृहादिकम्।**
**कथमेकत्वमापन्नमज्ञो ब्रूते न तत्त्ववित्।।**

– जहां जीव ही देह से अन्य पृथक् (भिन्न) है। वहां गृह आदि (पुत्र) पदार्थ एक कैसे हो सकते हैं? अज्ञानी ही ऐसे कहता है। तत्त्व का ज्ञाता नहीं कहता।

**कुटुम्बधनधान्यादि सर्वं कर्मसमुद्भवम्।**
**देहं च मन्यते य: स्वं कर्म बध्नात्यसौ कुधी:।।**

– जो कुबुद्धि कर्म से उत्पन्न होने वाले कुटुम्ब, धन, धान्यादि सब को और देह को अपना मानता है, वह कर्म का बन्धन करता है।

**एको दुष्करवृत्तसारमपि भो धृत्वा च मुक्त्यालयम्।**
**तस्मात्त्वं भज चैकमेकशरणं धर्मं त्यज स्वं गृहम्।।**

– हे भाई, तू अकेला ही अतिकठिन श्रेष्ठ चरित्र को धारण कर मुक्ति पाता है इसलिए तू एक धर्म की ही आराधना कर और अन्यत्व को छोड़।

22, श्रीजीनगरं, दुर्गापुरा, जयपुरम्


## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 150/–, पंचवर्षीय शुल्क 700/–, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारतीयसंस्कृतप्रचारसंस्थान**

खाता संख्या – **2139101912498**

**IFS Code - CNRB0002139**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

निर्माता

ए इन्फ्रास्ट्रक्चर लिमिटेड

एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज
एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

एस्बेस्टोस सीमेन्ट शीट्स

छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-9ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849/26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691/2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our
Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)

विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम्
अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द
माहेश्वरी द्वारा श्याम प्रिन्टर्स, किशनपोल बाजार, जयपुरम्
दूरभाषः 0141–4001974 पत्रसंकेतः– भारतीभवनम्,
बी–15, न्यू कॉलोनी, जयपुरम्–302001
दूरभाषः 0141–2379014

प्रतिष्ठायाम्,